CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 117.

Title KUVALAYANANDA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 117'
Subject : Alankāra.

Title : Kuvalayānanda.

Author : Appaya Dikshita
Scribe : Jayakanta.

Date of the work : —
Date of the Ms. : V.S. 1825

Place of the work : —
Place of the Ms. : Vārāṇasī

Size : 9.7" x 4.3"
Extent : Fol. 68.

Language : Sanskrit.
Script : Devanāgarī.

Remarks : Complete.

श्रीगणेशाय नमः ॥ अमरीकबरीभारभ्रमरीमुखरीकृतम् दूरीकरोतु दुरितं गौरीचरणपंकजं १ परस्परतपः
संपत्फलायितपरस्परौ प्रपंचमातापितरौ प्राञ्चौ जायापती स्तुमः २ उद्घाट्य योगकलया हृदयाब्जकोशं ध
न्यैश्चिरादपि यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ३
अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४ येषां चंद्रालोके दृ
श्यंते लक्ष्यलक्षणश्लोकाः प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यंते ५ उपमा यत्र सादृश्यलक्ष्मीरुल्ल
सति द्वयोः हंसीव कृष्ण ते कीर्तिः स्वर्गंगामवगाहते ६ यत्रोपमानोपमेययोः सहृदयहृदयाह्ला
दित्वेन चारु सादृश्यमुद्भूततयोल्लसति व्यंग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालंकारः हंसीवेत्यु
दाहरणम् इयं पूर्णोपमेत्युच्यते हंसी कीर्तिः स्वर्गंगा[illegible]वगाहनमिव शब्दश्चेत्येतेषामुपमानोपमे
यसाधारणधर्मोपमावाचकानां चतुर्णामप्युपादानात् यथा वा गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवे
श्वरः शिरसा श्लाघते पूर्वं परं कंठे नियच्छति अत्र यद्यप्युपमानोपमेययोर्नैकः साधारणधर्मः उ
पमाने ईश्वरे च दूरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चन्द्रस्य शिरसा श्लाघनं वहनं उत्तरस्य गरल

गुणस्य
स्य कंठे नियमनं स्थापनम् उपमेये तु बुधे गुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्य शिरसा श्लाघनं शि
रःकंपनाभिनंदनम् उत्तरस्य दोषस्य कंठे नियमनं कंठादुपरि वाचानुद्घाटनमिति भेदात् तथापि च
न्द्रगरलयोर्गुणदोषयोश्च बिंबप्रतिबिंबभावेनाभेदादुपादानं ज्ञानादीनां गृह्णन्नित्याद्येकशब्दोपादा
नेनाभेदाध्यवसायाच्च साधारणधर्मत्वेनेति पूर्वस्माद्विशेषः वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः
परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालंकारिकसमयः वर्ण्योपमानध
र्माणामुपमावाचकस्य च एकद्वित्र्यनुपादाने भिन्ना लुप्तोपमाष्टधा तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशो
र्मम कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ७ यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः तदेतत्काकतालीय
मवितर्कितसंभवम् ८ उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां च प्रतिपादकशब्दाभावेन लुप्तो
पमेत्युच्यते सा चाष्टधा यथा वाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता वाचकोपमेयलुप्ता उपमानलुप्ता वाचकोप
मेयलुप्ता धर्मोपमानलुप्ता धर्मोपमानवाचकलुप्ता चेति तत्रोपमानलोपरहिताश्चत्वारो भेदास्तडिद्गौरीत्या
दिना श्लोकेन द[illegible]ताः तद[illegible]भेदा उत्तरश्लोकेन दर्शिताः तडिद्गौरीत्यत्र वाचकलोपः तडिदिव गौरीत्यर्थे

शि० नो०

नै कुनः१ क

पमानानि सामान्यवचनैरिति समासविधायकशास्त्रौ। इन्दुतुल्यास्येत्यत्र धर्मलोपस्त्वैच्छिकः न शास्त्रकृतः
कुन. २ कान्त्या इन्दुतुल्यास्येत्यपि वक्तुं शक्यत्वात् कर्पूरन्तीत्यत्र धर्मवाचकलोपः कर्पूरमिवाचरन्तीत्यर्थे विहितस्य
कर्पूरवदानन्दात्मकाचारार्थस्य क्विपः सर्वापहारेण सह लोपात् अत्र धर्मलोप ऐच्छिकः नय[illegible]रानन्दात्मक नयो३
तया कर्पूरन्तीति तदुपादानस्यापि सम्भवात् कान्तास्मरवधूयन्तीत्यत्र वाचकोपमेयलोपः अत्र कान्ते
नं५ ति द्वितीयया सामर्थ्यात् स्वात्मा[illegible]कामवधूमिवाचरन्तीत्यस्यार्थस्यागम्यमानत[illegible]चात्मनुपमेय याप
स्य सहोपमावाचकेनानुपादानात् स त्वैच्छिकः स्वात्मानं स्मरवधूयन्तीत्युपमेयस्यापि संभवात् काक
तालीयमित्यत्र काकतालशब्दौ वृत्तिविषये काकतालसमवेतक्रियावृत्तिनौ तेन काकागमनमिव ता
लपतनमिव काकतालमिति द्वन्द्वार्थे सामासाद्युत्तद्विषयादिति ज्ञापकात्समासः उभयत्रोपमेयं स्वस्य
ञ्व कचिद्गमनं तत्रैव रहसि तस्याः स्यागमनं च तेन स्वस्य तत्स्वरूपसमागमं काकतालसमागमसदृशमिति फ
लतितं ततः काकतालमिव काकतालीयमिति द्वितीयम् इवार्थे समासाच्च तद्विषयादिति सूत्रेणैव प्रतिकृ
ता विवक्षिकारस्येन छप्रत्ययः तथा च यत्तनदलितं तालफलं यथा काकेनोपभुक्तमेवं रहोदर्शनं सुमि

कु

तदयानन्वीक्षितेनोपभुक्तेति तदर्थः तत्र काकागमनतालपतनसमागमरूपस्य काककृततालफलोपभो
गरूपस्य चोपमानस्यानुपादानात् प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायां वाचकोपमानलो
पः सर्वोप्ययं लोपश्छप्रत्ययविधायकशास्त्रकृतः अवितर्कितसंभवमिति साधारणधर्मस्यानुपादाने
प्रत्ययार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाचकलोप इति सहृदयैरवधातव्यम्
एतेषामुदाहरणान्तराणि विस्तरभयान्न लिख्यते उपमानोपमेयत्वंय[illegible]स्तुनः इन्दुरिन्दुरिव श्री देकस्यैव
तदे मानित्याद्यैरनन्वयः ८ एकस्यैव वस्तुनोपमानोपमेयत्ववर्णनमनन्वयः वर्ण्यमानमपि स्वस्य स्वेन सा उ६
१धा धर्म्येणान्वेतीति व्युत्पत्तेः अनन्वयिनोप्यर्थस्यास्मिन्सदृशान्तरव्यवच्छेदेनानुपमत्वद्योतनाय इन्दुरिन्दु
रिव श्रीमानित्युक्ते श्रीमत्त्वे चन्द्रस्य नान्यः सदृशोस्तीति सादृश्यान्तरव्यवच्छेदो लभ्यते ततश्च स्वेनापि सा
दृश्यासंभवादनुपमेयत्वे पर्यवसानं यथा वा गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं रा
मरावणयोरिव पूर्वोदाहरणे श्रीमत्त्वधर्मस्योपादानमस्ति इह तु गगनादिवे पृथुल्यादेर्धर्मस्योपादानं ना
स्तीति विशेषः पर्यायेणाद्वयोस्तच्चेदुपमेयोपमा मता धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि १० द्वयोः

पु१

कुव॰ ३ पर्यायेणोपमानोपमेयत्वप्रकल्पनं ततीयात्सादृश्यव्यवच्छेदार्थम् धर्मार्थियोर्हि किस्पविस्तेन विस्ताद्
श्यपेवर्तितितस्याप्यनेन साद्दृश्यमर्थासिद्धमविमुखतोवर्णमानं ततीयसाद्दृश्यव्यवच्छेदं फलतिति य
थावा रवमिव जलं जलमिव खं हंसइव चन्द्रश्चन्द्रइव हंसः कुमुदाकारास्तारास्ताराकाराणि कुमुदानि पूर्व
त्रपूर्णोपमादि तिधर्मउपात्तइह तु निर्मलत्वादिधर्मानोपात्त इति भेदः उदाहरणाद्वयेपिप्रकृत योरेवोपमानो
पैर्थ पमेयत्वकल्पनम् राज्ञिधर्मसिमृद्धिःशारदिगगनसलिलादिनैर्मल्यस्य वर्णनीयत्वात् प्रकृताप्रकृतयोरप्ये
षासंभवति यथावा गिरिरिविगजराजोयंगजराजइवोच्चैर्विभातिगिरिःनिर्झरइव मदधारामदधारेवास्य निर्झरः ६
स्रवति प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ११ प्रसिद्धोपमा
८ भाद्र: नोपमेयत्वप्राप्तिर्नोम्यात्प्रतीपम् यत्त्वन्नेत्रसमानकांतिसलिलेमग्नं तदिन्दीवरं तैरितः प्रियेतवमुखच्छायानु मेघैरं ४
कारीशशी येपित्वद्गमनानुसारि गतयस्तेराजहंसागतास्त्वत्साद्दृश्यविनोदमात्रमपिनैदैवेन नक्षम्यते अप्यो
पमेयलाभेतवर्ण्यस्यानादरश्चतत् अलंगर्वेणतेवक्त्रकांत्याचन्द्रोपिताद्दृशः १२ अत्युत्कृष्टगुणतयाव शाम०
र्ण्यमानस्यान्यत्र स्वसाद्दृश्यमसहमानस्योपमेयं किं विस्त्वद्दर्पितावतातस्यतिरस्कारोद्वितीयं प्रतीपम् पूर्व २
यथावा ४

उमसह
स्मादविविच्छित्तिविशेषशालि यथावा गर्वमसंभाव्यमिर्मलोचनयुगालेन किंवहसिमुग्धे सन्तीदृशानिदि
शिदिशिसरस्सुनीलनलिनानि वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः कः क्रौर्यदर्पस्तेमृत्योस्त्वत्तुल्याःसं
तिस्त्रियः १३ अत्युत्कृष्टगुणतयाक्वचिदप्युपमानभावमानस्यावर्ण्यस्यवर्ण्यमुपमेयं परिकल्प्यतावता
तस्यतिरस्कारः पूर्वप्रतीपवैपरीत्येन तृतीयं प्रतीपम् यथावा अहमेवगुरुःसुदारुणानामितिहालाहलता
तमास्मदृप्यः ननुसन्तिभवादृशानिभूयोभुवनेस्मिन्वचनानिदुर्जनानाम् वर्ण्येनान्यस्योपमायानिष्प
त्तिवचस्तत् मुधापवादोमुग्धाक्षित्वन्मुखाभंकिलांबुजं १४ अवर्ण्येवर्ण्योपमितिपनिष्पत्तिवचनम् पूर्व
स्पउत्कर्षशालिच तुर्थं प्रतीपं उदाहरणोमुधापवादत्वोक्तोपमितिपनिष्पत्तिरुद्घाटिता यथावा आकर्णयसरो
जाक्षिवचनीयमिदंभुवि शशांकस्तववक्त्रेणतुल्यामरैरुपमीयते प्रतीपमुपमानस्यकैमर्थ्यमपिमन्वते इत्थंवेद
दनंतस्याःकिंपद्मेनकिमिन्दुना १५ उपमेयस्यैवोपमानप्रयोजनधर्मवहत्वेनोपमानप्रातिलोम्यात्पञ्चमंप्रतीप
म् यथावा तदोजसस्तद्यशसःस्थितावमौवृथेतिचित्तेकुरुतेयदायदा तनोतिभानोःपरिवेषकैतवात्तदा
विधिःकुण्डलनांविधोरपि केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेनतदंतर्भावंमन्यंते अन्येतु

कु.न. ४ ६ उम

पञ्चमं प्रतीपप्रकारमुपमानाक्षेपत्वादाक्षेपालंकारमाहुः विषय्यभेदताद्रूप्यरंजनं विषयस्य यत् रूपकं
तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः १६ अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते विना शंभु
स्तार्तीयीकं विलोचनम् १७ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां अस्या मुखेन्दुना लब्धे नेत्रानंदे किमिं
दुना १८ साध्वीयमपरा लक्ष्मीरसुधा सागरोदिता अयं कलंकिनश्चन्द्रान्मुखचन्द्रोतिरिच्यते १९ विषय्यु
पमानभूतं चन्द्रादि विषयस्तूपमेयं वर्णनीयं मुखादि विषयिणोऽभेदेन ताद्रूप्येण वा विषयस्य रंजनं रूपकं
अन्यरूपेण रूपवतः करणात् तच्च क्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदे प्रतीयमान एव तद्रू
पधर्मारोपमात्रपर्यवसितम् तत्र रूपकं तदिदं द्विविधम् अभेदरूपकं ताद्रूप्यरूपकमिति द्विविधमपि प्रत्येकं
त्रिविधम् प्रसिद्धविषय्याधिक्यवर्णनेन तन्न्यूनत्ववर्णनेनानुभयोक्त्या च एवं रूपकं षड्विधम् अयं हीत्यादिसार्द्ध
श्लोकेनाभेदरूपकाणि अस्या मुखेन्दुनेत्यादिसार्द्धश्लोकेन ताद्रूप्यरूपकाणि आधिक्यन्यूनत्वानुभयोक्तिषु देशक्र
मप्रातिलोम्येनोदाहृतानि येन दग्धा इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धशिवाभेदानुरंजनात् शिवस्य पूर्वाव
स्थातो वर्णनीयराजभावावस्थायां न्यूनत्वाधिकत्वयोर्वर्णनाच्चानुभयाभेदरूपकमाद्यं तृतीयलोचनप्रहाणा

रि ए५ राम० ५

ह

श्री

त्पूर्वावस्थातो न्यूनताप्रदर्शनान्न्यूनाभेदरूपकं द्वितीयम् न्यूनत्ववर्णनमप्यभेददार्ढ्यापादकत्वाच्चमत्कार
कारि विषमदृष्टित्वपरित्यागेन त्र्यादृक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्षवि
भावनादधिकाभेदरूपकं तृतीयम् एवमुत्तरेषु ताद्रूप्यरूपकोदाहरणेष्वपि क्रमेणानुभयन्यूनाधिकभावा उ
न्नेयाः अनेनैव क्रमेणोदाहरणान्तराणि चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन्सरय्वा वादद्यूतं चिरतर
ममभूत्सिद्धयूनोः कयोश्चित् एको वक्ति प्रथमनिहतं कैटभं कंसमन्यस्त्वत्तस्त्वं कथय भवता को हतस्तत्र पूर्वं
अत्र सत्वमिति तेन कंसकैटभयोर्हन्ता गरुडध्वज स्त्वमिति सत्वमेव वर्णनीयस्य राज्ञः प्रतिपाद्य तं प्रति कंसकैटभवध
योः पौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यदार्ढ्याकरणात् पूर्वावस्थातः उत्कर्षापकर्षयोरविवक्षणाच्चानुभयाभेदरूप
कम् वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः॥ अत्र साक्षादिति वि
शेषणेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुपदिश्य नराकृतिरिति दिव्यमूर्तिकत्वप्रतिपादनान्न्यूनाभेदरूपक
म् त्वय्यागते किमिति वेपत एष सिन्धुस्त्वं सेतुमन्यपथकृत्तः किमसौ बिभेति द्वीपान्तरेपि न हि ते स्त्ववशं वदीय
त्वो राजपुंगव निवेदयतेवलक्ष्मीः अत्र त्वं सेतुमन्यपथकृदिति सेतोरमतमन्यपथस्य कर्त्री पुरुषोत्तमेन वर्णा

न:५

४५ ३वे

कुन· ५ नीयस्य तादात्म्यमुक्तं तथापि त्वदागमनं सेतुबन्धनाय मम्पनायवेति समुद्रेणानसेत्व्यम् द्वीपान्तराणाम्
पि त्वद्दर्शनावदत्वेन पूर्वं द्वीपान्तरे जेतव्याभावात्प्राप्तलक्ष्मीकत्वेन मन्मथनप्रसक्ताभावाच्चेति पूर्वविस्या तद्रूपक
र्षविभावनादधिकाभेदरूपकम् किमस्य भस्य कर्वितं हंति नयनानन्दं विधत्ते नैन्द्रं द्विवाकुषकेतनस्य कुरुते ना
लोकमात्रेणाकिम् वक्त्रेन्दौ तव सत्ययं यदपरः श्रीतंष्मुकरुज्जृम्भते दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे
अत्रापरः शीतांशुरित्यनेन वक्त्रेन्दोः प्रसिद्धचन्द्राद्भेदमाविष्कृत्य प्रसिद्धचन्द्रकार्यकारित्वमात्रप्रतिपादने
प्र नोत्कर्षापकर्षयोरदर्शनादनुभयतादूप्यरूपकम् अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोच
नः शंभुर्भगवान्बादरायणः अत्र ब्रह्मादि इति विशेषणाश्रयपितादूप्यमात्रविवक्षाविभाविता चतुर्वद
नत्वादिवैकल्यं चोक्तमिति न्यूनतादूप्यरूपकम् इदं विशेषोक्तमुदाहरणमिति वामनमतं यदाह एकगुणहा
नौ अन्यगुणसाम्यदार्ढ्यं विशेषोक्तिरिति किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ममकिल
श्रुतिमाहतदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रेण तिर्थ्यकाका गण० ५
लिकमनःप्रवेशाश्रुतितात्पर्यविषयः किंतु नलमुखचन्द्र एवेति ततोऽस्याधिक्यप्रतिपादनाभ्रिकतारूप्यरूपक

त्पदावपर मयि

न

म् रूपकस्य सावयवत्वनिरवयवत्वादिभेदप्रपंचनं चित्रमीमांसायां द्रष्टव्यं परिणामः क्रियार्थश्चेद्विषयी विष
यात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा १० पत्रारोप्यमाणो विषयी किंचित्कार्योपयोगित्वेन विषमा च्य
नः स्वविषयस्य तदुपयोगित्वासंभवात्प्रकृततादात्म्यतामपेक्षते तत्र परिणामालंकारः तत्रोदाहरणम् प्र
सन्नेनेति अत्र हि अब्जस्य वीक्षणोपयोगित्वं निबध्यते न तु दृशः मयूरव्यंसकादिसमासेन चोत्तरपदार्थप्राधा
न्यात् न चोपमितसमासाश्रयणेन दृगब्जमिवेति पूर्वपदार्थप्राधान्यमस्त्विति वाच्यम् प्रसन्नेनेति सामान्यधर्म
प्रयोगादुपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति तदप्रयोग एवोपमितसमासानुशासनात् अत्र स्यवीक्षणो
पयोगित्वेन स्वात्मनासंभवतीस्य तत्तस्य प्रकृतदृगात्मतापरिणामपेक्षणात्परिणामालंकारः यथावा तीर्त्वाभू
तेशमौलिस्रजममरधुनीमात्मनासौ तृतीयस्तस्मै सौमित्रिमैत्रीमयमुपकृतवान्तरं नाविकाय व्यामग्राह्यस्त
नीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे अत्रारोप्यमाणोऽन्यो नात
रः सौमित्रिमैत्रीरूपतापत्या गुहोपकारलक्षणकार्योपयोगी न स्वात्मना गुहस्य रघुनाथे कृपाप्रसादाप्रेक्षित्वेन वेत

न

स ध

कु न ६ नार्थित्वाभावादिति परिणामः पूर्वं त्वनुमासोदाहरणमिन्दत्वनुसमासोदाहरणमिति भेदः ॥ बहुभिर्बहुधो
ल्लेखादेकस्योल्लेख इष्यते स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥ ११ ॥ यत्र नानाविधधर्मयोगेनैकं
वस्तु तत्तद्धर्मयोगरूपनिमित्तभेदादनेकेन गृहीत्रानेकधोल्लिख्यते तत्रोल्लेखः अनेकधोल्लेखने रुच्यर्थि
कं त्वभयादीनि यथार्हं प्रयोजकं रुचिरभिरतिः अर्थित्वं लिप्सा भयं भीतिः स्त्रीभिरित्याद्युदाहरणं अत्र
एक एव राजा सौन्दर्यवितरणपराक्रमशालीति स्त्रीभिरर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः काम
कल्पतरुकालरूपो दृष्टः यथा वा राजन्नातेति वृद्धाभिः श्रीकांत इति यौवतैः यथास्थितस्त्वं बालाभिर्दृष्टः प्रौ
ढैः सकौतुकं अत्र यस्त्वया भीतेमन्तं राजं त्वरयात्रायते स्म सोयमादिपुरुषोत्तम इति हृष्टाभिः संसारभीत्या
तदमर्यर्थिनीभिः कृष्णोपमथुरां पुरं प्रवि सन्दृष्टः यस्त्वया चंचलत्वेन त्रासितायाः श्रियो पिकामोपचारवै
दग्ध्येन नित्यं वहन्नमः सोयं दिव्यपुवेतिपुवतिसमदृष्टः सोल्लंठैर्दृष्टिवालाभिस्तु बाल्यगात रूपवेषालंकारदर्शी
नमात्रलालसाभिर्यथावस्थितवेषपुत्रतो दृष्ट इति व रुधोल्लेखः पूर्वकामत्वाधारोपैरूपकसंकीर्णः अयं तु शु
द्ध इति भेदः एकेन बहुधोल्लेखेप्यसौ विषयभेदतः गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने ॥ १२ ॥ गृहीतृभेदाभावेपि वि ाम० ६

नौं ३ख ए २

६

षयभेदाद्बहुधोल्लेखनादसावुल्लेखः उदाहरणं श्लेषसंकीर्णं च चोदिविषये न हात्पर्दुरित्यादिवत्‌ स्पतिरि
त्याद्यर्थान्तरस्यापि क्रोडीकरणात्‌ शुद्धो यथा अङ्के पांकुचयोः कुपां विलग्ने विपुलं च क्षुषि विस्तृतं नितंबे त्र
धरे रुणामाविरस्तु चित्ते करुणा शालिकपालिभागधेयम्‌ ॥ स्यात्स्मृतिर्भ्रान्तिसंदेहैस्तदंकालंकृतित्रयं पं
कजे पश्यतः कान्तामुखं मे गाहते मनः ॥ १३ ॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पंकजं पंकजं वा सुधांशुर्वेत्य
स्माकं तु न निर्णयः ॥ १४ ॥ स्मृतिभ्रान्तिसंदेहैः सादृश्यान्निबध्यमानैः स्मृतिमान्भ्रान्तिमान्ससन्देह इति स्म
त्यादिपदाङ्कितमलंकारत्रयं भवति तत्क्रमेणोदाहृतं यथा वा दिव्यानाम विहृतविस्मयां पुरस्तादम्भस्तः
स्फुरदरविन्दचारुहस्ताम्‌ उद्वीक्ष्य श्रियमिव कांचिदुत्तरन्तीमस्मार्षीज्जलनिधिमन्थनस्य शौरिः पूर्वत्र
स्मृतिमुदाहरणे सदृशस्येव स्मृतिः अत्र सदृशालक्ष्मीस्मृतिपूर्वकं तत्संबन्धितो जलनिधिमन्थनस्यापि
स्मृतिरिति भेदः पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः सोपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति
अत्रान्योन्यविषयभ्रान्तिनिबन्धनः पूर्वस्माद्विशेषः जीव नग्नहरणेन भ्रान्त्या गृहीत्वा पुतस्स्थिताः किं कनि
ष्का किमुन्नेषा घटीयं चम्पदुर्जनाः पूर्वोदाहृतसन्देहः प्रसिद्धकोटिकोपंत्व प्रसिद्धकोटिक इति भेदः शुभाय

२दुदाहरणं स्मृ

ही

विय रंग

कुव. १

कृतिरन्यस्यारोपार्थो धर्मनिन्हवः नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं वर्णनीये वस्तुनि तत्स
दृशधर्मारोपफलकस्तदीयधर्मनिन्हवः कविमतिविकाशोत्प्रेक्षितधर्मान्तरस्यापि वा निन्हवः शुद्धा
पन्हुतिः यथा चन्द्रे [illegible]न्दीवरपुण्डरीकत्वारोपफलकस्तदीयधर्मस्य चन्द्रत्वस्यापन्हवः यथा वा अङ्कं केपि कं ३
शशंकिरे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे इन्दौ यद्दलितेन्द्रनील
शकलश्यामं दरीदृश्यते तत्सान्द्रं निशि पीतमंधतमसं कुक्षिस्थमाचक्ष्महे अत्रोत्प्रेक्षितधर्माणा
मप्यपन्हवः परपक्षत्वोपन्यासादर्थसिद्धः स एव युक्तिपूर्वश्चेदुच्यते हेत्वपन्हुतिः नेन्दुस्ती
व्रो न निशार्कः सिंधोरौर्वोयमुत्थितः ७६ अत्र चन्द्र एव तीव्रत्वनैशिकत्वयुक्तिभ्यां चन्द्रत्वसूर्यत्वाप
पा न्हवो वडवानलत्वारोपार्थः यथा वा मंथानभूमिधरमूलशिलासहस्रसंघट्टनव्रणकिणाः स्फुरतीन्दु
मध्ये छायामृगः शशक इत्यतिपामरोक्तिस्तेषां कथंचिदपि तत्र हि न प्रसक्तिः अत्र चन्द्रमध्ये मन्थन
शैलिकमन्दरशिलासंघट्टनव्रणकिणस्यैव छायादीनां संभवो नास्तीति छायाद्यपन्हवः पा राम०
मरवचनत्वोपन्यासेनाविष्कृतः अन्यत्र तस्यारोपार्थः पर्यस्तापन्हुतिस्तु सः नायं सुधांशुः किं तर्हि

सु

कु

सुधांशुः प्रेयसीमुखं यत्र क्वचिद्वस्तुनि तदीयधर्मनिन्हवः अन्यत्र वर्णनीयवस्तुनि तस्य धर्मस्या
रोपार्थः स पर्यस्तापन्हुतिः यथा चन्द्रे चन्द्रत्वनिषेधः वर्णनीये वस्तुनि प्रेयसीमुखे तदारोपार्थः यथा
वा हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते निपीय जागर्ति सुखेन तं शिवः स्पृशन्नि र
मां मुह्यति निद्रया हरिः पूर्वोदाहरणे हेतूक्तिर्नास्त्यत्र तु सास्तीति भेदः ततश्च पूर्वापन्हुतिवदत्रा
पि द्वैविध्यमिति द्रष्टव्यम् भ्रान्तापन्हुतिरन्यस्य शंकायां भ्रान्तिवारणे तापं करोति सोत्कंपं ज्वरः किं न
सखि स्मरः ७८ अत्र तापं करोतीति स्मरवृत्तान्ते कथिते तस्य ज्वरसाधारण्याद्बुद्ध्या सख्या
ज्वरः किमिति पृष्टे न सखि स्मर इति तत्त्वोक्त्या भ्रान्तिवारणं कृतम् यथा वा नासिकासमधिकोन्न
तिरिह महिषः कोयमुभयतः पुच्छः न हि न हि कलिकलत्रोपस्थ[illegible]गोपमस्य न तु पुच्छः इदं संभ
वद्भ्रान्तिपूर्विकायां भ्रान्त्यापन्हुतावुदाहरणं कल्पितभ्रान्तिपूर्वा यथा जटा नेयं वेणीकृतकचकला जा
पो न गरलं गले कस्तूरीयं शिरसि शशिलेखा न कुसुमं इयं भूतिर्नांगे प्रियविरहजन्मा धवलिमा पुरारातिर् भ्रां
भ्रान्त्या कुसुमशर मां किं व्यथयसि अत्र कल्पितभ्रान्तिर्जटा नेयमित्यादिनिषेधमात्रेणोन्नेया पूर्वस्य

कवि पु

कु न ८

न्नाभावात् दंडी त्वत्र तत्वाख्यानोपमेत्युपमाभेदं मेने यदाह न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे इ
ति विस्पष्टसादृश्यपत्तत्वाख्यानोपमामतेति छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे प्रजल्पन्मत् स्त्रा ३
पदे लग्नः कान्तः किं न हि नूपुरः ४६ कस्याश्चित्कांचित्प्रति रहस्योक्तावन्येन श्रुतायां [illegible]स्तोक्तेस्य यी
न्तरवर्णनेन तथ्यनिह्नवे छेकापह्नुतिः छेकस्य विदग्धस्यापह्नुतिः यथा नापि कथा न मे सखी प्र
ति प्रजल्पन्मत्पदे लग्न इति स्वनायकवृत्तांते निवेद्यमाने तदाकर्ण्य कान्तः किमिति शङ्कितवती
मत्वां प्रति न हि नूपुर इति निह्नवः यथा वा सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चं ना
गरिकः किमु मिलितो न हि न हि सखि हैमनः पवनः ४६ समर्थयोजनर्यतथ्य चितीन्हवेउदाहरणं
शब्दयोजनपाय यथा पद्मे त्वं नयनेस्मरामि सततं भावो भवत्कुंतले नीले मुह्यति किं करोमि महितैः
क्रीतोस्मि ते विभ्रमैः इत्युत्स्वप्नवचो निशम्य सरुषा निर्भर्त्सितो राधया कृष्णस्तत्परसेवतद्य पदि
शप्क्रीडाविटः सर्वमिदं वियोगस्य योजने उदाहरणम् विषयेकोप्यवस्थाभेदेन यथा वदंशि जारव रामः
तीतं पत्यौ च तासखी विर्यपितिं बुध्वा सखित तः प्रवुद्धा स्मीत्यपूरयत् केतवापह्नुतिर्व्यक्तौ व्याजा ८
योजने २

पाखवः २ प

द्येन निह्नुतेऽपदेः निर्यांति स्मरनाराचाः कान्तादृक्पातकैतवात् ४७ अत्रासत्यत्वाभिधापिनाकैतवप
देन नेत्रकान्ताकटाक्षाः किंतु स्मरनाराचा इत्यपह्नवः प्रतीयते यथा वा दिक्षु वारिकथया विपिनोद
रेषु मध्याह्नकक्षितत्तमहातपतापतप्ताः स्कंधान्तरोच्छितदवाग्निशिखाछलेन जिह्वां प्रसार्य तरु
वो जलमर्थयन्ते संभावनास्यादुत्प्रेक्षा वस्तुहेतुफलात्मना उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदेप
रे ध्वमस्तोमं तमःपुंजं कोकी विरहशुष्कलाम् लिम्पतीव तमोंगानि वर्षतीवांजनं नभः ३ रक्तौ तवांघ्रि
मृदुलौ भुवि विक्षेपणाद्ध्रुवं त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ३३ मध्यः किं कुचयोर्धृत्यै वन्द्यः
कनकदामभिः प्रायो ज्ञत्वत्पदे नैकं प्राप्तुं तोये तपस्यति ३४ अन्यधर्मसम्बन्धनिमित्तेनान्यस्यान्य
तात्म्यसम्भावनमुत्प्रेक्षा सा च वस्तुहेतुफलात्मनां गोचरत्वेन त्रिधा अत्र कस्यचिद्वस्तुनो वस्त्वंत
रतादात्म्यसंभावनापूर्णमास्वरूपोत्प्रेक्षेत्युच्यते अहेतोर्हेतुभावेन फलस्य फलत्वेन चोत्प्रेक्षा हेतू
त्प्रेक्षा फलोत्प्रेक्षेत्युच्यते आद्यास्वरूपोत्प्रेक्षा उक्ताविषयानुक्तविषया चेति द्विविधा परे हेतुफलो
त्प्रेक्षे सिद्धविषयासिद्धविषये चेति प्रत्येकं द्विविधे एवं षण्मुत्प्रेक्षाणाम् ध्वमस्तोमेत्यादिना क्र

यत नया

ध्यः ८ अंग

कुन ८ मेणोदाहरणानि रजनीमुखे सर्वत्र चिरस्त्वरस्य तमसो नैल्यदृष्टिप्रतिरोधकत्वादिधर्मसंबंधेनागम्यमा
नेन निमित्तेन सर्वःप्रियघ्राटितसर्वदेशास्थितकोकांगनाहृदयगतप्रज्वलितधूमरहानलधूमस्तोमता
दात्म्यसंभावनास्वरूपोत्प्रेक्षा तमसो विषयस्योपादानादुक्तविषया तमोव्यापनस्य तमःप्रभृतिभूपर्यन्त
सकलवस्तुसान्द्रमलिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादात्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षणता
दात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा उभयत्रापि विषयभूतस्य तमोव्यापनस्यानुपादानादनुक्त
विषया अन्यत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा नभसो भूपर्यन्तगाढनीलिमव्याप्तेन प्र
निमित्तेनांजनवर्षणकर्तृतादात्म्योत्प्रेक्षा चेत्युत्प्रेक्षाद्वयमुक्तविषयमेवास्तु मैवं लिम्पतिवर्षतीत्या
८ पि ख्यातयोःकर्तृवाचकत्वेऽभावप्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रियाया एव प्राधान्येन तदुपसर्जनत्वेना
न्वितस्य कर्तुरुत्प्रेक्षणीयान्यत्रान्वयासंभावात् अत एवाख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्यत्रा
न्वयासंभवादेव हे तोस्त स्योपमाया मुपमानतयान्वयो दण्डिना निराकृतः के तीयधुपमानस्यान्वयभतो धान० ८
सो क्रियापदे स्वक्रियासाधनव्यग्रो नालमन्यव्यपेक्षितुमिति केचित्तु तमो नभसोर्विषययोस्तत्कर्तृकले

३ यत पि २

हे २

पनवर्षणात्त्वस्य धर्मोत्प्रेक्षमाहुः तन्मते स्वरूपोत्प्रेक्षा पाधर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा चेत्येवं द्वैविध्यं द्रष्टव्य
म् चरणपोःस्वतःसिद्धरक्तिमनि वस्तुतो विक्षेपरागेण हेतुरिति अहेतोस्तस्य हेतुत्वेन संभावना हेतू
त्प्रेक्षा विक्षेपरागस्य विषयस्य सत्त्वात्सिद्धविषया चन्द्र पद्मविरोधित्वाभाविकेनापि कावतनकान्तिप्रेमानहेतु प्रा
रिति तत्र हेतुत्वसंभावना हेतूत्प्रेक्षा वस्तुतस्तदिच्छाया अभावादसिद्धविषया मध्यः स्वयमेव कुचौ धरति
न तु कन्दरामवकृत्त्वेनाध्यवसितापाव सितपगालितापावलातिदि मध्यकर्तृककुचधृते स्तत्फलत्वेनोत्प्रे
क्षासिद्धविषया फलोत्प्रेक्षा जलजस्य जले निजावास्थितेरुदवासतपस्त्वेनाध्यवसितायाःकामिनीचरणा
साम्यप्राप्तिर्न फलमिति तस्यागानकुसुमाय मानापास्तपःफलत्वेनोत्प्रेक्षणामसिद्धविषया फलोत्प्रेक्षा
अनेनैव क्रमेणोदाहरणान्तराणि बालेन्दुवक्त्राण्यविकाशभावाद्बभुःपलाशान्यतिलोहितानि सद्यो वसन्ते
स्व नसमागतानां नखक्षतानीव वनस्थलीनां अत्र पलाशमुकुलानां वक्रत्वलौहित्यसंबन्धेन निमित्तेन वसं
तनायकसंबन्धवनस्थलीसंबंधिसद्यःकृतनखक्षततादात्म्यसंभावनोक्तविषया स्वरूपोत्प्रेक्षा पूर्वोदाहर
णे निमित्तभूतधर्मसंबन्धस्योपादानादिह रूपान्तरमिति भेदः नन्विवप्रादस्य सादृश्यपरत्वेन प्रसिद्धत्वादुपमैवास्तु

मागन २ सं तर

कुन० लिम्पतीवेत्युदाहरणे लेपनकर्तृरूपमानत्वार्हस्य क्रियोपसर्जनत्वं यदि हनखश्चेत्तानामन्योपसर्जनत्वस्योप
१० माबाधकस्याभावात् उच्यते उपमायायं न क्वचिदवस्थितेरपि नखक्षतेः सहवकुंपाकतयावसन्तनायकस
मागतवनस्थलीसंबंधित्वस्य विशेषणस्यानपेक्षितत्वात् इह तदुपदर्शनं पलाशमुकुलानां नखक्षतताहास्य ३३
संभावनाया निवद्धमवस्थापयतीति तथात्वम् एवं तद्विशेषणासापेक्ष्यात् अस्तिच सम्भावनायामिव
शब्दः दूरेतिष्ठन्देवदत्त इव भातीति पिनष्टीव तरंगाग्रे समुद्रः फेनचंदनम् तदादायकरैरिन्दुर्लिम्पतीव
दिगंगनाः अत्र तरंगाग्रैः फेनचन्दनस्य पेषणं पेषणात योत्प्रेक्ष्यते समुद्रादुत्थितस्य चन्द्रस्य प्रथमं समु
द्रपूरे प्रसृतानां कराणां दिक्षु व्यापनं च समुद्रोपान्तफेनचन्दनकृततत्प्रलेपत्वेनोत्प्रेक्ष्यते उभयत्र रूसेणास
मुद्रप्रान्तगतफेनचन्दनपुञ्जीभवनं दिशां धवलीकरणं च निमित्तमिति केन चन्दनप्रेरणाकिरणव्यायतयो
विषययोरनुपादानादनुक्तविषयेयं स्वरूपोत्प्रेक्षे येपान्तू पात्तयोः समुद्रचन्द्रयोरेव तत्कर्तृकपेषणलेपनरू
पधर्मोत्प्रेक्षेति मतं तेषां मते पूर्वोदाहरणे धर्मिणो धर्मिणो धर्मस्येति यतादात्म्योत्प्रेक्षा इह तु धर्मिणि धर्मसंसर्गोत्प्रेक्षेति राम०
भेदोवगन्तव्यः रात्रौ रवेर्दिवा चन्द्र रमाभावाद्दिवसप्रभुं भमोप्रतापयशसी स्वच्छतत्तामतोदिते रात्रौ रवेर्दिवा चन्द्र १०

स्याभावः सन्नपि प्रतापयशःसर्गे न हेतुरितितस्य तद्धेतुत्वसंभावना सिद्धविषया हेतूत्प्रेक्षा यथा वि
वस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम् गावो पि नेत्रापरनामधेया स्तेनेदमान्ध्यं खलु नाः स्त्र्य
कारैः अत्र विवस्वता कृतं स्वकिरणैः सहजन लोचननयनसदेवमात्रान्ध्यं प्रति हेतुत्वेनोत्प्रेक्षतमुत्पासिद्ध हृयं
विषया हेतूत्प्रेक्षा पूर्वं विधुर्वर्धयितुं पयोधेः शङ्के यमेणं कमलिं किपन्ति यया सिदोधिप्रियविप्रयोगेसशोक
कोकीनयने किपन्ति अत्र चन्द्रेण कृतं समुद्रस्य तहरणं स देव तदातेन कृतस्य चन्द्रकान्तश्रवणस्य कोकांगना
६ वाष्पस्रवणस्य च फलत्वेनोत्प्रेक्षा तदितिस्निं विषया फलोत्प्रेक्षा रथस्थितानां परिवर्तनाय पुरा तनानामिवा
५ना हूनां उत्पत्तिभूमौ तुरगोत्तमानां द्विपिप्रतस्थेर विरुतस्यां अत्र रोत्तसाप रणस्याश्च परिवर्तनमसदेव फलत्वेनो २५
६ हृयं त्प्रेक्षितं उत्प्रसिद्धविषयाफलोत्प्रेक्षा एता एवोत्प्रेक्षाः मन्येशंके ध्रुवं प्रायो नूनमित्येवमादिभिरुत्प्रेक्षा व्यज्यते शब्दै म३
रिवशब्दो वितादृशउत्प्रेक्षाव्यं क त्वेन परिगणितानां शब्दानां प्रयोगे गम्योत्प्रेक्षा यथा त्वत्कीर्तिर्भ्रमणश्रा
२शा न्ता विवेश स्वर्गनिम्नगा मिति स्तकातिशयोक्तिस्या निर्गीर्याध्यवसानतः प्रस्तनीलोत्पलद्वंद्वान्निसरन्ति शिताः शराः
स्य विषयस्य शब्देनोक्तेः स्वनं विनापि विभावच केनैव प्राकृतेन ग्रहणं विषयनिगरणं तत्पूर्वकं विषयस्य
श्रो

श्री
कुन. ११ विषयिरूपतयाध्यवसानमाहार्यनिश्चयः तस्मिन्सति रूपकातिशयोक्तिः यथा नीलोत्पलशरप्रांशुमयो
लोचनयोः कटाक्षाणांच ग्रहणं पूर्वकं तद्रूपताध्यवसानं यथावा वापीकापिस्फुरतिगगनेतत्परं सूक्ष्म
पद्यां सोपानालीमधिगतवती कांचनीमैन्द्रनीली अग्रेशैलौसुकृतिसुगमौचन्दनच्छन्नदेशौ तत्रत्यानांसु
लभममृतं संनिधानात्सुधांशोः अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः अत्रातिशयोक्तौ रूपकविशेष
णां रूपके दर्शितानां विधानामिहापि संभवोस्तीत्यतिदेशेन प्रदर्शितार्थे तेनाप्येतेभेदा अतिशयोक्तिस्ता
दि द्रूप्यातिशयोक्तिश्चेति विध्यं तत्राप्याधिक्यन्यूनतादिभागश्चेति सर्वमनुसंधेयं यथावा समाकृष्टग्रासैरु
पवनचकोरैरनुसृतं किरन्ज्योत्स्नामच्छांनवलवलिपाकप्रणयिनीम् उपप्राकाराग्रंप्रहिणुनयनेतर्कयमना ए५
नागनाकाशेकोपं गलितहरिणंशीतकिरणः अत्रकोपं गलितहरिणं इत्युक्त्याप्रसिद्धचन्द्राद्भेदः ततउ
त्कर्षश्चाभिमतः एवमन्यत्रापूह्यं यथाप्रकृतिगर्भत्वंसैवसापन्हवामता त्वत्सूक्तिषुसुधायाजन्मेत्यपह्नुति
तौविधौ अत्र त्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिश्चन्द्रमंडलस्यमृतंनभवतीत्यपह्नुतिगर्भा
यथावा मुक्ताविद्रुममन्तरामधुरसः पुष्पंपरं ध्रूर्वहं प्रालेयद्युतिमण्डलेखलुतयोरेकासिकानाशीचेतद्वेदज्ञ राम ११

कथ श्री
तिशांखमूर्द्धिनपुनः पूर्वाचलाग्रंतरेतानीमानि विकल्पयंतितद्गुणैर्येषां न साहस्यं अत्रैश्चररसएवमधु रस
इत्यतिशयोक्तिः पुष्पंरसोनमधुरसइत्यापह्नुतिगर्भा अलंकारसर्वस्वकृतास्वरूपोत्प्रेक्षासापह्नववत्युक्तं यां २
दृ गतामुतीरंतिमिघट्टनेनससंभ्रमं पौरविलासिनीषु यत्रोच्छलत्फेनततिच्छलेनमुक्ताट्टहासेवविभातिसि
प्रेति ततस्त्रियानत्रभेदः पत्नत्रस्फुटाप्रापन्हुतिगर्भत्वमुक्तं पत्र फेनततित्वमपह्नुतं तत्रैवाट्टहासत्वोत्प्रेक्ष
णात् इदं पर्यस्तापह्नुतिगर्भत्वं इन्दुमंडलादावपह्नुतस्यामृतादेः सन्नयादिषु निवेशनात् इदं च पर्यस्ताप
ह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभवति तत्रस्वरूपोत्प्रेक्षायां यथा ज्ञानेरागादिदं बिंबं बिंबस्यं तमितोधरत्वं ति ५
द्वयोर्विशेषावगमाक्षमाणां नभिन्नमोभूदनयोर्जनानां अत्र प्रसिद्धफले बिंबतामपह्नुत्यातिशयोक्तिनिमित्ते
नि नदमयन्त्यधरेतदुत्प्रेक्षापर्यस्तापह्नुतिगर्भा हेतूत्प्रेक्षायां तद्गर्भत्वं प्राग्लिखिते हेतूत्प्रेक्षोदाहरणे एवद्रष्टव्यं त
त्रचान्धकारेध्वान्ध्यहेतुमपह्नुत्यान्यत्र निवेशितं फलोत्प्रेक्षायां यथा रवितप्तोगजःपद्मास्तस्यत्वाबाधितुंध्रुवं
मसरो विशतिनस्नातुंगजस्नानं हि निष्फलं अत्राजस्यसरःप्रवेशनस्यप्रतिफले स्नानेफलत्वमपह्नुत्य पद्मबा वा
धनेतन्निवेशितम् अलमनया प्रसक्तानुप्रसक्त्याप्रकृतमनुसरामः भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनं
त भेद५ चथ५

कुव॰
१२

अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः अत्र लोकप्रसिद्धगांभीर्यादिभेदेऽपि भेदो वर्णितः यथा
वा अन्यैव रूपसंपत्तिरन्या वैदग्ध्यधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः संबंधातिश
योक्तिः स्यादयोगे योगकल्पनम् सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं ३६ यथा वा कतिपयदि
वसैः क्षयं प्रयायात्कनकगिरिः कृतवासरावसानः इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीर
रुद्रदेवे अत्र चक्रवाक्याः सूर्यास्तमयकारकमेरुक्षयसंभावनाप्रवृत्तसंतोषासंबंधेपि तत्संबंधो वर्णि ख ५
तः योगेऽप्ययोगः संबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे अत्र द्रुमेष्वादरसं
बन्धेऽपि तदसंबंधो वर्णितः यथा वा अनयोरनवद्यांगि स्तनयोर्जृंभमाणयोः अवकाशो न पर्याप्तस्तव बाहु
लतांतरे॥ अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगंति समं देव ज्यां शरासं पराश्च ते ३७ अत्र प
दामोर्व्याश्च शरसंधानं तदानीमेव शत्रवः क्षितौ पतंतीति हेतुकार्ययोः सहत्वं वर्णितं यथा वा मुंचसि मुंचति कोपमंज नि ३
तिमंजति प्रकंपमरिवर्गः हम्मीरवीर खड्गे त्यजति त्यजति क्ष्मामाशु अत्र खड्गस्पर्शो धात्र्यादिकालएव रि राम॰
पूरणं धनाः हत्यादौ वर्णितं चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे यास्यामीत्युदिते तन्व्या वलयो मुद्रिका ३८ १२

चं गादि १ व

न्य ४

अत्र नायकप्रवासप्रसक्तिमात्रेणायोचितोतिकार्श्यं कार्यमुखेन दर्शितम् यथा वा आदातुं सकृदीक्षितेऽपि
कुसुमे हस्ताग्रमालोहितं लाक्षारंजनवार्तयापि सहसा रक्तं तलं पादयोः अत्र अंगानामनुलेपनस्मरणमप्यत्य य
न्तखेदावहं हस्ताधीरवृत्तः किमन्यद्दलकामोदो विभाव्यते यथा वा यामि न यामीति धवे वदति पुनस्तत्क्षणेन
तन्वंग्याः गलितानि पुरैव वलयान्यपराण्यपि तथैव दलितानि अत्यंतातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे अ
ग्रे मानो गतः पश्चादनुनीता प्रियेण सा यथा वा कवीन्द्राणामासन्प्रथमतरमेवांगणभुवश्चलद्भृंगासंगाकुल
करिमदामोदमधुराः अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः एता
स्तिस्रो व्यतिशयोक्तयः कार्यशैघ्र्यप्रस्तावमात्रायोः वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता संकुचंति सरोजा
नि स्वैरिणीवदनानि च ३९ त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते मालतीशशभृल्लेखाकदलीनां कठोरता ४०
प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययोगिता संकुचंतीति प्रस्तुततुल्ययोगितायामुदाह
रणे तत्र प्रस्तुतचन्द्रोदयकालीनतया वर्णनीयानां सरोजानां प्रकाशभीतस्वैरिणीवदनानां च संकोचरूपैकक्रि
यान्वयो दर्शितः उत्तरश्लोके नायिकासौकुमार्यवर्णने प्रस्तुतवर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणान्वयः

शी

कुन° १३ यथा वा सञ्जातपत्रप्रकराञ्चितानि समुद्वहन्ति स्फुटपाटलत्वम् । विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धि-
मीयुः ॥ नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः । लब्ध्वापि लोके परिणाहि रूपं जातास्तदूरू-
पमानबाह्याः ॥ अत्र ग्रीष्मवर्णने तदीयत्वेन प्रस्तुतानां दिनानां पद्मानां चैकक्रियान्वयः । ऊरुवर्णने अप्रस्तुतानां क-
रिकराणां कदलीनां चैकगुणान्वयः ॥ हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता । प्रदीयते पराभूतिर्मित्रशात्रवयो-
५व स्त्वया ॥ अत्र हिताहितयोर्मित्रशात्रवयोः पराभूतिदानस्य पराभवदानस्य च श्लेषेणाभेदाध्यवसायाद्वृत्तितौल्यम् ।
यथा वा यश्च निंबं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥ अत्रच्छेत्तृसिंचत्य च-
तिरित्यध्याहार्यैर्वाक्यानि पूरणीयानि । पूर्वोदाहरणं स्तुतिपर्यवसायि इदं तु निन्दापर्यवसायीति भेदः ॥ इयं सरस्व-
तीकंठाभरणोक्ता तुल्ययोगिता । गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता । लोकपालो यमः पाशी श्रीदः शक्रो चो ४
भवानपि ॥ ४१ ॥ अत्र वर्णनीयो राजा यमादिभिर्लोकपालत्वेन समीकृतः । यथा वा संगतानि मृगाक्षीणां तडिद्वि-
लसितान्यपि । क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥ पूर्वत्र स्तुतिरिह निन्दा इयं काव्यादर्शे दर्शिता इमां राम० १३
तुल्ययोगितां सिद्धिरिति केचिद्व्यवजहुः ॥ यदाह जयदेवः सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये । युवामेवेह वि- ॥

व१

प्रतिभाति मदेन भाति कलभ इत्यत्राप्रस्तुतस्यैव प्रथमा न्वयः ८

न१

ख्यातौ त्वं बलेर्जलधिर्जलैरिति ॥ मतान्तरेऽत्र वक्ष्यमाणं दीपकमेव वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं
बुधाः । मदेन भाति कलभः प्रतापेन महीपतिः ॥ ४२ ॥ प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकम् । यथा कल-
भनृपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः । यथा वा मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः । कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते
गलितविभवाश्चार्थिषु नृपाः ॥ अत्र प्रस्तुतानां नृपाणामप्रस्तुतानां मण्यादीनां शोभनैकधर्मान्वयः । प्रस्तुतै- च
कनिष्ठः समानो धर्मः प्रसंगादन्यत्रोपकरोति प्रासादार्थमारोपितो दीपो रथ्यायामिवेति दीपसादृश्याद्दीपकम्
संज्ञायां चेतीवार्थे कन्प्रत्ययः । यद्यपि सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः । शूरश्च कृतविद्यश्च यश्च जाना-
ति सेवितुम् ॥ इत्यत्र प्रस्तुताप्रस्तुतानां युगपद्धर्मान्वयः तथापि प्रासंगिकत्वं न हीयते वस्तुतः प्रस्तुतोद्देशेन क३
प्रवृत्तस्यैव वर्णनस्याप्रस्तुतेष्वप्यन्वयात् । न हि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन ज्ञानार्थमारोपितस्य
सत्त्वस्यातिथिष्यः प्रथममपक्षिप्तत्वेन च प्रासंगिकत्वं हीयते । तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति वि-
शेषाग्रहणात्सर्वेषां वर्णितानामेव धर्मौक्तिरिति विशेषः । यद्युभयोरनयोरुपमालंकारस्य गम्यत्वाविशेषेऽपि तत्राप्रस्तु-
कश्चायं चानयोरपरो विशेषः १

पकार दर्शितानि

कुव० १५ तमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थिते तदुपमानोपमेयभावस्तत्र तु विशेषाग्रहणादैच्छिकः सदृशं त्रिवि
धं दीपकमाहत्तौ भवेदावृत्तिदीपकं पदस्यार्थस्य चोभयोः ? पीस्ये माचक्षवीरा ४३ उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजा
द्रुमाः माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ४४ दीपस्यानेकोपकारार्थंतया दीपस्थानीयस्य शब्दस्या
र्थस्य वा उभयोर्वा आवृत्तौ त्रिविधमावृत्तिदीपकम् क्रमेणाद्वित्रयेणोदाहरणानि यथा वा उत्कंठयति मे
घानां माला वांकिलाविनाम् यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः शमयति जलधरधारा चातकयूनां त
वेचिरोपनतां शमयति च वधूलोचनजलधारा कामिनां प्रवासरुचिम् वदनेन निर्जितं तव निलीयते चन्द्र
बिम्बमम्बुधरे अरविन्दमपि च सुन्दरि निलीयते पाथसां पूरे एवं चावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वा
भावेपि दीपकच्छायापायत्तिमात्रेणादीपकव्यवदेशः वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता तापेन भ्रा
जते सूरः शूरश्चापेन राजते ४५ यत्रोपमानोपमेयवाक्ययोरेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा प्रतिव
स्तूपमा प्रतिवस्तु प्रतिवाक्यार्थमुपमा समानधर्मोस्यामिति व्युत्पत्तेः यथात्रैव राजत इत्येक एक एव धर्म उ राम० १५
पमानोपमेयवाक्ययोः पृथङ्निर्दिष्टः यथा वा स्थिरा शैली गुणवतां खलबुद्ध्या न बाध्यते रत्नदी

प्रतिवस्तूपमायां प्रस्तुताप्रस्तुतानामिति विशेषः ॥ अयं चापरो विशेषः ॥ आवृत्तिदीपकं वैधर्म्येण न संभवति

पस्य हि शिखावात्यया विनाश्यते यथा तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति
स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते अत्र यद्यप्युपमेयवाक्ये अनिच्छा उपमानवा
क्ये अवीक्षेति धर्मभेदः प्रतिभाति तथापि वीक्षणमात्रस्यावर्जनीयस्य प्रतिषेधानर्हत्वादिच्छापूर्व
कवीक्षाप्रतिषेधोपमनिच्छापर्यवसित एवेति धर्मैक्यमनुसन्धेयम् अर्थावृत्तिः प्रस्तुतानामप्रस्तुतानां
वां प्रतिवस्तूपमा तु वैधर्म्येणापि दृश्यते यथा विद्वानेव हि जानाति विद्वज्जनपरिश्रमं न हि वन्ध्या वि
जानाति गुर्वीं प्रसववेदनाम् यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् न हि कस्तूरिकामोदः
शपथेन विभाव्यते ४६ बिंबप्रतिबिंबत्वे दृष्टान्तस्तदलंकृतिः त्वमेव कीर्तिमान्राजन्विधुरेव हि कान्तिमान् ४७
यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिम्बप्रतिबिंबभावेन निर्दिष्टौ तत्र दृष्टान्तः । त्वमेव कीर्तिमा
नित्यत्र कीर्तिकान्त्योर्बिम्बप्रतिबिम्बभावः यथा वा कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः यथा वा देवीं वाचमुपासते हि बहवः सारं तु सारस्व
तं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरतामापाताल

पं० दीनमणिशंकर

निमग्नपीवरस्तनुर्जनाति मन्याचलः नन्वत्रोपमानोपमेयवाक्ययोर्न्नुनिमेकएवधर्मइतिप्रतिवस्तूपमा
पुन० १५ युक्तास्यैवं अचेतने मन्याचले ज्ञानस्यबाधितत्त्वेनतत्र जानातीत्यनेन सागराधस्तलावधिपर्यन्तसंस्पर्शमात्र
स्यविवक्षितत्वात् अत्रोदाहरणोपदाहृतिदीपकाद्विशेषः पूर्वस्यप्रस्तुताप्रस्तुतविषयत्वकृतोऽस्यत्वेवैध
थ र्म्येणापि दृष्टप तेकृतं चाभीभिमुखं मनस्त्वयाकिमन्यदेवं निहताश्च नोद्विषः तमांसितिष्ठन्ति हि तावदंशुमा
न्नयावदायात्युदयाद्रिमौलिताम् वाक्यार्थयोःसदृशयोरैक्यारोपोनिदर्शना यद्दातुः सौम्यतासेयं पूर्णेन्दोर
कलंकता ४५ अत्रदातृपुरुषसौम्यत्वस्योपमेयवाक्यार्थस्यपूर्णेन्दोरकलंकत्वस्योपमानवाक्यार्थस्य
५ रूनं चयत्वेन्याभेदारोपः यथावा अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽम्बुजमवरोपितं सुचिरमूषरेवर्षितं अ
श्वपुच्छमवनामितं बधिरकर्णजापः कृतो धृतोन्धमुखदर्पणो यदबुधोजनः सेवितः अत्राबुधजनसेवाया
अरण्यरुदितादीनांचपरस्पराभेदारोपः पदार्थवृत्तिमप्येकेवदन्त्यन्यां निदर्शनाम् त्वन्नेत्रयुगलं धत्ते ली
लां नीलाम्बुजन्मनोः अत्रनेत्रयुगलेनीलाम्बुजातलीलापदार्थारोपोनिदर्शना यथावाविप्रयोगोगौडनारीणां
योगांडतलपाण्डिमा अहृष्यत तरवजरीमञ्जरीगर्भरेणुपुञ्ज स्मितं दाहरणेउपमेयउपमानधर्मारोपः इद रम० १५
दृ ३ पूर्वत्रैकवाक्यार्थे एकस्यैवारोपोत्रतु अनेकेषां मेकत्रैवारोपः।

य

तूपमानेउपमेयधर्मारोपइतिभेदः उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेनतत्समानधर्मारोपादौपम्ये
पर्यवसानंतुल्यं इयंपदार्थवृत्तिनिदर्शनाललितोपमेतिजयदेवेनव्याहृता यथाविप्रयोगोगौडनारीणामिति
३ या. श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनामुदाहृतवन्तस्तथापि विशिष्टयोर्धर्मयोरैक्यारोपोवाक्यार्थवृत्तिनिदर्श
ना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शनेतिव्यवस्थामाश्रित्यास्माभिरिहोदा
हृतः एवंच त्वयिसतिशिवदातर्यस्मदभ्यर्थितानांमितरमनुसरंतोदर्शयन्तोर्थिमुद्राम् चरमचरणापातेदुर्ति
हृदोग्धुकामाः करभमनुसरामःकामधेनौस्थितायाम् दोर्म्यानिनीर्षुरस्मान्तुषृषुस्त्वहुताशीवम् बिं
७ वाक्यार्थ इत्यादौवाक्यभेदाभावेपि वृत्तिरेवनिदर्शना विशिष्टयोरैक्यारोपसद्भावात् वाक्यार्थयोःसदृशयोरि दृ
तिलक्षणवाक्येवाक्यार्थशब्देनबिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टरूपयोःप्रस्तुताप्रस्तुतधर्मयोर्विवक्षित
त्वात् एवंचराजसेवामनुष्याणामसिधारावलेहनम् पञ्चाननपरिष्वङ्गो व्यालीवदनचुंबनम् इत्यत्रप्र
नां स्तुताप्रस्तुतवृत्तयोरैक्यपदोपात्तत्वेवाक्यार्थवृत्तिनिदर्शनायाः नलक्षणत्वंयोर्बिम्बप्रतिबिम्बभावापन्नव
स्तुविशिष्टयोपारूपत्वादितिअतएवनिदर्शनायारूपकाद्भेदः रूपकेत्वविशिष्टयोरेवमुखचन्द्रादिकयोरैक्या

कुन० १६ रोपः अत्रापि दर्पणो हरेरूर्ध्वं मुष्टिसोबलिनियम्हैं विविधविभूषणमस्यनालदं एणो मुदेस्तु व इति विशिष्ट
रूपकोदाहरणोपि न बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टता विधातुर्विश्वकमलशिल्पिकत्वरूपसाधार
णधर्मवत्तामेव पादनार्थमेव तत्र विशेषणोपादानात् यद्यप्यत्र तु सोम्यतेत्यादि निदर्शनोदाहरणे दात्तृपर्शो
द्यादीनामानन्दकरत्वादिनेवात्र विष्टरपद्मबलिनियमरूपयोर्विशेषणयोर्बिम्बप्रतिबिम्बभावाभावात् रा
पत्र तु विषयविषयिविशेषणानां परस्परसादृश्येन बिम्बभावोस्ति ज्योत्स्नाभस्मच्छुरणधवला विभ्रती
रकास्थीन्यन्तर्धानसिद्धिव्यसन रसिकारात्रिकापालिकीयम् द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं
सिद्धाञ्जनपरिमलं लांछनस्य च्छलेनेति सावयवरूपकोदाहरणे तत्रापि विषयविषयिणोस्तद्विशेष
णानां च प्रत्येकमभेदारोपः न तु ज्योत्स्नादिविशिष्टरात्रिरूपस्य विषयस्य भस्मादिविशिष्टकापालिकी
रूपविषयिणास्वविशिष्टरूपेणारोपोस्ति तस्माद्राजसेवामनुष्याणामित्यादावपि वाक्यार्थे वृत्तिनिदर्श
नेति युक्तमिमं मतान्तरे त्विह पदार्थवृत्तिनिदर्शनयाभाव्यम् अपरां बोधनं प्राहुः क्रियया सत्तदर्थयोः नश्ये
राम० १६ न्नविरोधीतिद्धीरणां चन्द्रोदयेतमः ५८ उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् विभावयन्समृद्धीनां फलं सुहृ

र्षय

नत्वार २ माहुः ॥ असदर्थबोधने उन्नरा इमुदाहरणं ॥ नन्वन नश्येदिति बोधयेदिति वक्तव्ये बोधयेदित्यस्यागम्यमा
दनुग्रहम् ५९ कस्यचित्किंचित्क्रियया विशिष्टस्य स्वक्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं य
त्रिबध्यते तदपरां निदर्शनां प्राहुः तत्र सूर्योद्गता चन्द्रेणासह विरुध्य स्वपतनाशक्रियया विशिष्टं तमः
स्वकीयनाशक्रियया दृष्टान्तभूतया अन्योप्येवं राजविरुद्धश्चेन्नश्येदित्यनिष्टपर्यवसायिनमर्थं बोधयदे
वनष्टमिति तिरोधानादसदर्थनिदर्शना तथोत्तरश्लोके सविता स्वोदयसमये एव पद्मेषु लक्ष्मीमादधानस्त
यापन्नलक्ष्म्याधानक्रियया परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयन्निबद्ध इति स रा ६
दर्थनिदर्शनायाम्बायां उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतः पृषद्गणश्चारुमारु पि २
तधुतः पतत्यधः अत्र गिरिशिखरगतवृष्टिबिन्दुकर्णो मन्दमारुतमात्रेणाकम्पितः पतदुन्नतपदप्रा
प्तिः पतनहेतुरित्यसदर्थबोधयन्निबद्ध इत्यसदर्थनिदर्शना चूडामणिपदे धत्ते यो देवं रविमागतं सतां कार्या
तिथेयीति बोधयन्गृहमेधिनः अत्र समागतं रविं शिरसा संभावयन्नुदयाचलः स्वनिष्ठयार विधारणक्रि
यया समागतानामेवं गृहमेधिभिरातिथ्यं कार्यमिति सदर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना अत्र केचि
द्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमसम्भवद्वस्तुसंबन्धनिबन्धनमिति तृतीया तु संभवद्वस्तुसंबन्धनिबन्ध
नेति वक्तव्यं वह्नित्यथाहि अत्र निदर्शनायां वाक्यार्थयोरेवासमसम्भवत्त्वयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनाया

र व

व

यथा ३ अत्र सहोक्तिजयोरुन्नतत्वे समेष्युपमेये सति प्रकृतिकोमलत्वमाधिक्यविशेषः ५ सट

कुन मपि अन्यधर्मेणापन्नासमर्थत्वं धर्मिणः सामर्थ्ये पर्यवस्यति ततो पनिदर्शनायां तु स्वक्रियया परान्प्रति सदर्थ
११ बोधनं सम्बन्धे वसमतां गमीकरोति बोधयन्नूहमेधिन इत्यादौ कारीषोणिरध्यापयतीतिवत्सामर्थ्याच्च रणोति
च प्रयोगः ततश्च कारीषोतिः शीतापनयनेन बहूनध्य यनसमर्थान्करोति एवं च वर्ण्यमानः पर्वतः स्वमुप
मानभावेन गूढमेधिनः उक्तबोधनसामर्थ्यं किंतु हिमतेपयायं पर्वतः समागतं रविं विशेषस्संभावयति एवं गूढमे
५ या धीसमागतं सन्तमुचितपूजं संभावयेदिति अतः संभवति बोधनसबन्ध इति॥ व्यतिरेको विशेषश्चेदुपमानो
पमेययोः शैला इवोन्नताः सन्तः किंतु प्रकृतिकोमलाः ५० अत्र उपमेये पाधिक्यपर्यवसायी विशेषः यथा वा पह्न व्यतिरेकः
वतः कल्पतरोरेव विशेषः करस्यते वीरभूपति कर्णः एकः परस्तु करोति रस्तु कृते तं त्वन्नत्वपर्यसापीय च च ५
या रक्तत्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि कां
न्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ८ अत्र अनुपपर्यसा
पीपप्याद्वतरनिकषमुत्कर्षोपनिषत्स्य सहजमलिनस्वरूपणास्वरूपाप्नाशस्य च केवलमाकृयतो नेदं सहो
क्तिः सहभावश्चेद्भासते जनरंजनः दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ५१ छायासंश्रयते तले विटपिनो राम० ११
पदं

यथा वा

श्रान्तेव यास्यैः समं मूलं पाति सरोजलस्य जडतां म्लानेव मीनैः सह आचामत्यहिमांशुदीधितिरपस्तासे
वल्लोकैः संतनिद्रागर्भगृहं सह प्रविशति ल्कानेव कान्ताजनैः जनरंजन इत्युक्तेः अनेन सांद्रविरहांबुरातेरि
हो त्यादौ न सहोक्तिरलंकारः १० विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते विद्यावद्यापि सावद्या विना विनयसं
पदं प्रश्नवासंन्नयप्येतुमं चरामोन पथपतिर्निंदितः समवेदेश्चौके स्वात्माप्येनं विगाहयेत् अत्र रामदर्शनं विना निंदि
तत्वं विनाशब्दमन्तरेणापि प्रदर्शितम् तत्त्वे किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते विना खलैर्विभात्येषा राजे
न्द्र भवतः सभा ५३ यथा वात्र विशर्ते शशिति तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा गांगारीधःपतनकलुषा गृह्यतीव प्रसादं अत्र तमःप्रभृतीनि विना
निशादीनां रम्यत्वं विनाशब्दमन्तरेणादर्शितम् समासोक्तिः परिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेत् अयमैन्द्री
मुखं पश्य रक्तश्चुम्बति चन्द्रमाः ५४ यत्र प्रस्तुतस्य वृत्तान्ते वर्ण्यमानविशेषणसाम्यबलादप्रस्तुतस्यापि परि
स्फूर्तिस्तत्र समासोक्तिरलंकारः समासेन संक्षेपेणाप्रस्तुतप्रस्तुतवृत्तान्तपौर्वचनात् उदाहरणमयमैन्द्री
ति अत्र चन्द्रस्य प्राचीप्रारंभसंबंधलक्षणोदये वर्ण्यमाने मुखपा स्य प्रारंभवदनसाधारणपाद्रत्न संबंधस्या

रणात्कामुकस्साधारणत्वाच्चुंबतीत्यस्य प्रस्तुतार्थसंबंधमात्रपरस्य शक्त्यार्थांतरसाधारण्याच्च
कुव. १८ न्द्रमःशब्दगतपुल्लिंगेन ऐंद्रीगतस्त्रीलिंगेन तत्प्रतिपाद्येन्द्रसंबंधित्वेन चोपस्थापनात्प्रस्तुतपरवनितास
क्तपुरुषवृत्तान्तःप्रतीयते। यथा वा व्यावल्गत्कुचभारमाकुलकचं व्यालोलहारावलि प्रेंखत्कुंडलशोभि
गंडयुगलं प्रस्वेदि वक्त्राम्बुजं शश्वत्त्वत्करघातमत्र विकमज्यात्सुंदरसादेतया यस्मात्कंदुकसादरं सुभ
गया संसेव्यसे तत्कृती। अत्र कंदुकवृत्तांतेन रमणीमनेन व्यावल्गत्कुचभारत्वादिक्रिया विशेषणसाम्यादि
परीतरता सक्तनायकवृत्तान्तः प्रतीयते। पूर्वत्र विशेषणानि श्लिष्टानि इह साधारणानीति भेदः। सारूप्या
दपि समासोक्तिर्दृश्यते। यथा पुरस्यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं याता घनविरलभावः
क्षितिरुहाम्। बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति। अत्र
वनवर्णने प्रस्तुते तत्सारूप्यात्कुटुंबिषु धनसंतानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य
ग्रामनगरादेर्वृत्तान्तः प्रतीयते। अत्र च विशेषणसाम्याभावात्सारूप्याद्वाच्यादप्रस्तुतवृत्तांतस्य प्रत्यायनं तत्समुक्त राम० १८
ते विशेषे तत्समारोपार्थं सर्वथैव प्रस्तुतानन्वयिनः कविसंरंभगोचरत्वायोगात्तत्र समासोक्तेः प्र
पि

अप्रस्तुत२ समारोप

स्तुते व्यवहारसमारोपश्चारुताहेतुः न तु रूपकवत्प्रस्तुतेऽप्रस्तुतरूपसमारोपोऽप्यस्ति मुखं चन्द्र इत्यत्र मुखे च
न्द्रत्वारोपहेतुचन्द्रपदसमभिव्याहारवदत्र भजति चन्द्रमा इत्यादिसमासोक्त्युदाहरणे चन्द्रादौ जारत्वा
द्यारोपहेतोस्तद्वाचकपदसमभिव्याहारस्याभावात्। निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारि
कायाः। धारानिपातैः सह किं नु वान्तश्चन्द्रोऽयमित्यार्ततरं ररास। इत्याद्येकदेशविवर्तिरूपकोदाहरण इव
प्रस्तुतेऽप्रस्तुतरूपसमारोपगमकस्याभावात्। तत्र विद्युन्नयनैरित्यत्र निरीक्षणानुगुणतया उत्तरपदार्थप्र
धानं मयूरव्यंसकादिसमासव्यवस्थितौ उत्तरपदार्थप्रधानतया नयनानुरोधात्पयोदे मुखकमपि द्रष्टृपुरु
प षत्वरूपं सामर्थ्यमुपनाम्यते न चेह तथा निरीक्षणावत्त्वप्यागतेः किमिति चेत एवं सिंधुरिति श्लोके सेतुरुक्तं
त्वादिविशेषणाप्रस्तुतासाधारणत्वात्तौ तदुपात्तोऽस्ति ना विश्लिष्टसाधारणादिविशेषणसमर्पितयोः प्रस्तु प्रा
ताप्रस्तुतवृत्तांतयोरप्रस्तुतवृत्तान्तस्य विद्युन्नयनवत्प्राधान्यमस्तीति येन तदनुरोधात्सेतुमन्थकृदित्यत्र
योद इत्यत्रेव चानुक्तमपि प्रस्तुते प्रस्तुतरूपसमारोपमभ्युपगच्छेम तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहार
समारोपमात्रमिह चारुताहेतुः यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणादिविशेषणसमर्पित
चे३

कुन: १८

योर्भिन्नपदोर्क्तविशेषणयोरिवविशेष्ययोरेव साक्षादन्वयादस्तिसमप्राधान्यं तथाप्यप्रस्तुतवृत्तान्ता
न्वयानुरोधात्प्रस्तुते ऽप्रस्तुतसमारोपो गीकार्यः तथाहि यथाप्रस्तुतविशेष्ये ऽप्रस्तुतवृत्तान्तस्यना
स्त्यन्वययोग्यता तथैवाप्रस्तुतेपि जारादौनास्ति प्रकृतवृत्तान्तस्यान्वययोग्यता एवं च समप्रधानयोः प्रकृ
ताप्रकृतवृत्तान्तयोरन्यतरस्यावश्यकसमारोपेभ्युपगंतव्ये श्रुत एव प्रस्तुते प्रस्तुतस्यारोप आरूढता हेतु
वं५ रिति प्रतीतं न च वै सति विशेषणसाम्यात् अप्रस्तुतस्यागम्यत्वे समासोक्तिः विशेषणानां साम्येन यत्र
प्रस्तुतवर्तिनां अप्रस्तुतस्यागम्यत्वं समासोक्तिरितीष्यते इत्यादीनी प्राचीनानां समासोक्तिलक्षणानि नसं
गच्छेरन् प्रस्तुते श्लिष्टसाधारणादिरूपविशेषणसमर्पितानुरागपूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तांतसमा
४ रुमादे रोपस्य चौक्तत्वाभ्युपगमेन विशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यंजनानपेक्षणादिति चेतन्न च
तेस्वरूपतो प्रस्तुतवृत्तान्तसमारोपो न चारुताहेतुः किंत्वप्रस्तुतकामुकादिसंबंधित्वेनागम्यमानस्य तत व३
स्यारोपार्थः तथा च तस्यैव रसानुगुणत्वात्तन्नचतावदवगमनेविशेषणपदानां सामर्थ्यमस्ति अत्र नखक्षतादिम राम० १८
हिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुंबनादिना तत्संबंधिनिरूपणाद्दोस्मारिति पुनरध्यारोपे तदीय
कामुकादौ च भिव्यक्ते पुनस्तदीयत्वानुसंधानं न चभवति
यथा स्वरूपनः दृष्टेन राजादिना तत्संबंधिनि

गर्भं स्त्य

त्वानुसंधानं तद्वदिति विशेषणसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापेक्षा अत एव श्लिष्टविशेषणाया कं २
मिवसाधारणविशेषणायामप्यप्रस्तुतव्यवहारसमारोपइत्येव प्राचीनानां प्रवादः दुकेव्याव त्वा कुच भारत्वादि विशि
ष्टवनितासेव्यत्वस्य कामुकसंबंधित्वे नैव समारोपणीयत्वात्स्वरूपतः कंदुके पितस्य सत्वेनासमारोपणीय श्या
त्वात् किंच साहृदयनिबंधनत्वेनोदात्ततायां समासोक्तावप्रस्तुतवृत्तान्तस्याश ॰ र्थस्याप्रस्तुतवृत्तान्तरूपेणै
वगम्यतयातेन रूपेण तस्य समारोपसिद्धेरन्यत्रापि तथैवयुक्तमिति प्रत्युक्तमेव प्राचीनानां प्रलक्षणमितिभावनीयम् ची
अलंकारः परिकरः साभिप्राये विशेषणे सुधांशुकलितोत्तंसस्तापं हरतु वो हरः अत्र सुधांशुकलितोत्तंस इति ह
७ मध्यी रविशेषणं तापहरणसाभिप्रायं यथा वा तव प्रसादात्कुसुमायुधोपि सहायमेकं मधुमेव लब्ध्वा पूर्वा हरस्यापि पि कु
नाकपाणेर्धैर्यच्युतिं के मम धन्विनोन्ये अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुधस्य सहायस्याहरणाद्वि
शेषणं च सारासारायुधत्वाभिप्रायं गर्भे यथावासवी शुचिनिधानस्य कृतघ्नस्य विनाशिनः शरीरकस्यापि कृ
ते मूढाः पापानि कुर्वते अत्र शरीर विशेषणानि तस्य हेयत्वेनासेव्यत्वाभिप्रायाणि इति असतां सर्वे
तथा स्थितेषु तिलांजलीन वल्मीकतोनामौनानभवन च्युतस्य सुमहत्वादीव्यवनाभिषिक्ता चित्रे नृपे तद्वत्या

मवकाथं सुत्रामिर्त्तो संगुरुर्देवित्वरुपावंदवरीमईवार्तुवाचं शङ्कुया। अत्र श्रुतिगतानव्यास्यमित्या
कुव० २० दीनि स्वस्मिन्व्यासाद्यसाधारणकार्यकरणप्रतिषेधमुखेन नाहं व्यास इत्याद्यभिप्रायगर्भाणि पदार्थ
रूपाणि च द्वितीयोदाहरणे भिन्नाभिप्रायगर्भाणि व्यस्तार्थरूपाणि चेति भेदः तेषु व्यस्तार्थसद्भावे
पि न ध्वनिव्यपदेशः हरस्य तापहरणे त्र्यक्षर्षसम्पादकत्वान्न न स्यस्यैमुत्पन्नपायेन सर्वथानिषे
र्यमञ्जकत्वेन गतिरक्षसाम पापमाचरतां सकृत्त्वे स्वस्य वरणीयाजगुणकथनात्तत्त्वे चवा अत एवो पस्का
रकत्वात् अत एव व्यङ्ग्यार्थस्य वाच्यपरिकरत्वात्परिकर इति नामास्यालंकारस्य कं चित्तु निष्प्रयोजनत
विशेषणोपादाने पुष्टदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य दोषाभावमात्रं न कश्चिदलंकारः एक
निष्ठ ताद्दृशाने कविशेषणोपन्यासः परं वैचित्र्यविशेषास्यि परिकर इत्यलंकारमध्ये परिगणितम् इत्याहुः
तत्तु तुच्छं अनेकविशेषणोपन्यासस्यैव परिकर इति न नियमः श्लेषयमकादिषु पुष्टार्थदोषाभावेन तत्रै
कस्यापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशेषसद्भावात्परिकरत्वोपपत्तेः यथा अतियत्नेत
निर्जीय दिदेवतामुमयत श्रावते पुपुषतेत्ययशष्ठि तिमतेवसदैवतका वयं वनवानवता किमहितहा अ राम० २०

त्र पुरुहूतपदं जोघुतान् नन्दादीन्प्रति भगवतः कृष्णस्य वाक्यं गोवर्धन गिरिरस्माकं रक्षकत्वेन दैवतमिति स एव
पर्जन्यः नारक्षकः पुरुहूत इत्येवं परवत्त्वतेति गोवर्धगिरेर्विशेषणाकाराणां वत्वान्निर्हरत्वादिमत्वाद्वपुष्य
फलमलतराजसादि निराकरणानामस्माकमसमद्भना नाना वाचापमेव रक्षक इत्यभिप्रायगर्भं एवमेकस्या
विसाभिप्रायस्य विशेषणस्य विन्यासस्य विच्छित्तिविशेषवशादलंकारत्वमिति यावन्यत्रापि सुधांशुकलितोत्त
स इत्यादौ तस्यात्सत्लाभोन निवार्यते अपि च एकपदार्थहेतुकं काव्यलिंगमलङ्कार इति सर्वसम्मतम् तद्वदे
कस्यापि विशेषणस्य साभिप्रायस्यालङ्कारत्वं युक्तमेव साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः चतुर्णां पु
रुषार्थानां दाता देवश्चतुर्भुजः अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदातृत्वसामर्थ्याभिप्रायगर्भं यथा वा
फणीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयेश्वरः द्रुमसाखिंडलः शक्तः क्वाहमेषकतेगुणाः फणीन्द्र इत्यादिविशेष्यपदानि
शेष्यपदानि सहस्रमुखत्वाद्यभिप्रायगर्भाणि नानार्थसंश्रयः श्लेषो वर्ण्योवर्ण्योभयास्पदः सर्वदो माधवः पा
यात्स योगागमदीधरः अच्चेत्त्वन्मुखं तुल्यं हरिणाहितसक्तिना उच्चैर्महरविकीलानः पुष्पुभेदा हतीपति ५८
अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च

कुव० २१ सर्वदेत्यादिना क्रमेणोदाहरणानि तत्र सर्वदो माधव इति श्लोके तुल्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनमिति प्र
कृतश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्र समितौ समरे प्रघातो यस्य तद्रुधिरस्य सेनापते रेव वर्णनं प्र
कृतमिति प्रकृताप्रकृतश्लेषः यथा वा जातः कामोदरोपेन रोधाधिकरुणात्मना पतनामारणाख्यातः स
मेत्तु पारणां प्रभुः नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः सदृशौ वनवृद्धानां कमलानां त्वदीक्षणे अ
साम्युदयमाहृढः कान्तिमानत्र क्तमंडलः राजा हरति लोकस्य हृदयं मृदुलैः करैः अत्राद्ये तुल्यत्वेन प्रकृते
यो रामकृष्णयोः श्लेषः द्वितीये उपमानत्वेनाप्रकृतयोः पद्महंसयोः श्लेषस्तृतीये राजवर्तिनि प्रस्तावे प्र
कृतस्य प्रत्यग्रोदितचन्द्रस्य नवाभिषिक्तनृपतेश्च श्लेषः यदत्र प्रकृताप्रकृतश्लेषोदाहरणोदाहृते शक्तिमूल
ध्वनिमिति ध्वनिप्राञ्चस्तत्प्रकृताप्रकृताभिधानमलंकारस्योपमादेरलंकारस्य व्यंग्यत्वाभिप्रायं न तु प्रकृतस्यैव
व्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयत्वाद्व्यंग्यभावे तद्व्यक्त्यनपेक्षणात् यद्य
पि प्रकृतार्थे प्रकरणबलादिति बुद्धिस्थिते सत्येव पश्चान्नृपतिगात्वधनादिवाचिनां राजकरादिनामन्यो
न्यसन्निधानबलान्नद्विषयशक्तेरोन्मेषपूर्वकमप्रकृतार्थः स्फुरति नैतावतावतानस्य व्यंग्यत्वं शक्त्या प्रतिपा राम० २१

द्यमाने सर्वथैव व्यक्त्यनपेक्षणात् पर्यवसिते प्रकृतार्थाभिधाने पश्चात्स्फुरतीति चेत् कामं तर्हि श्लेषोऽभव
तु अस्तित्वात्पत्राभिपाठश्लेष यथा अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः सततमसुम
तामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति मन्दमग्निमधुरार्यमोपलादर्शितश्वयथु चाभवत्तमः दृष
यस्तिमिरजं सिषेविरे दोषमोषधिपतेरसन्निधौ अत्र हि समासोक्त्युदाहरणयोः प्राकरणिकेऽर्थे प्रकर
णवशादिति बुद्धिस्थे विशेषणसाम्यादप्रकृतोऽपि वृद्धवेश्यावृत्तान्तः प्रतीयते तस्य समासोक्तेर्व्यङ्ग्ये
ष्विति सर्वेषामभिमत एषः एवमन्यत्रापि श्लेषे ध्वनियुक्तिर्निकार्या रम्या इति प्रासवतीः पताकानां विवि
क्ताः इति वृद्धिपत्नीपस्यामसेवन्तनमद्धलीकाः समं वधूभिर्वलिभी युवानः अत्र द्वितीयान्ताद्विविशेषणसम
र्पितार्थान्तरात्प्रादसामर्थ्येन वधूभिरनन्वयः विभक्तिभेदात् न च विभक्तिभेदे वितदन्वयाक्षेपकसाध
र्म्यमिह तिवक्रमस्तियतन्यत स्मिन्नधिकपयः श्रियेवहन्त्यः संक्षोभं पवनभुवा बजेननीताः वाल्मीकेरर
हितरामलक्ष्मणानां साधर्म्यं दधति गिरां महासरस्य इत्यत्र वाक्ये तु श्लेषोऽभवेत् समेमित्येतत्त्रिविशेष
णां तु सहार्थत्वेनाप्युपपन्नमत्र भप्लुविशेषणार्थान्वयात् उपमाप्रतीतेः सामर्थ्येनालमवनेतत्समर्थ

कुव. २१ सौन्दर्यबलादेवजदन्वयानुसंधानमिति शुद्धश्लेषः तदनु तद्बलादेव समदृश्यस्य साधर्म्यादिविकल्पनमिति वाच्यत्वे
वोपमालङ्कारस्य तदङ्गमयं श्लेषस्यैवमिति प्रपञ्चेन तत्सिद्धं श्लेषत्रैविध्यं एवं श्लेषः प्रकारान्तरेणापि द्वि
विधः सभङ्गः उदाहरणानि तेषु अब्जकीलालवाहिनीत्यादिश्लेषे पुष्परस्य रंजिनि षष्ठ्यन्तपदभङ्गमनपेक्ष्यना
नार्थक्रोडीकारादभङ्गश्लेषः सर्वदो माधवीं गाहिरिणा हितसङ्क्लिनेत्यादिषु परस्परवलक्षणां यदभङ्गमन
पेक्ष्यनानार्थक्रोडीकारात्सभङ्गश्लेष इति तत्र सभङ्गश्लेष इति शब्दालङ्कारः अभङ्गश्लेषस्त्वर्थालङ्कार इति केचि
त् उभयमपि शब्दालङ्कार इत्यन्ये उभयमप्यर्थालङ्कार इति स्वाभिप्रायः एतद्विवेचनं चित्रमीमांसायां द्र
ष्टव्यम् अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ५८ यत्राप्रस्तु
तवृत्तान्तवर्णनं प्रस्तुतावगतिपर्यवसायि तत्राप्रस्तुतप्रशंसालंकारः अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिश्चाप्र
स्तुतप्रस्तुतयोः संबन्धे सति भवति संबन्धश्च सामान्यविशेषभावः कार्यकारणभावो वा सम्भवति सामान्य
विशेषभावे सामान्याद्विशेषस्य विशेषात्सामान्यस्यावगतौ द्वयम् कार्यकारणभावेपि कार्याकारणस्य कार
णात्कार्यस्यावगतौ द्वैविध्यम् सारूप्यं त्वेको भेद इत्यस्याः पञ्च प्रकाराः यदाहुः कार्ये निमित्ते सामान्ये विशेषे राम० २१

प्रस्तुते सति तदन्यस्य वचस्तुल्ये तुल्यस्येवेति पञ्चधेति तत्र सारूप्यनिबन्धनोदाहरणमेकः कृतीति अत्राप्रस्तु
तस्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्स्वरूपे क्षुद्रेष्वपि प्रस्तुतप्रशंसो या नाभिवृत्ते मानिनि प्रपी
नस्य तिर्यथा वा आब्रह्मकृत्रिमसरोजकलिलं मिलितारोपितोसन्तापितैः पद्मिनीयदि स्वामन्नेन कुम्भतटयग
नलेपटस्य नोदकरिष्य। वृत्तिकर्णं हरिणाधिपस्य अत्र भुनकस्य निन्दा निन्दनीयत्वेन प्रस्तुते तत्स्वरूपे
कृत्रिमव्यांवहारमात्रेण विहन्तामतिनृपतिर्वैधेयेपयवस्यति यथा वा अन्तश्छिद्राणि भूयांसि कण्टका
बहवो बहिः कथं कमलनालस्य मा भूवन्भङ्गुरा गुणाः ॥ अत्र कमलवृत्तान्तकीर्तनं तत्स्वरूपे बहिः
खलेषु ग्रामात्तमुद्गात्पुत्रादिभिरन्तः कलहं कुर्वाणो पुरुषे पर्यवस्यति एवं च लक्ष्यलक्षणयोः प्रशं
सा अप्रस्तुति निन्दासाधारणा सरूपकीर्तनमात्रयरोऽप्यस्याः सामान्यनिबन्धनायां विधावरसा
मर्थ्येन योर्यस्य उदासते निक्षिप्य दर्दिविंध्ये कंपोरते ते भिमार्हतं अत्र प्रागेवसामर्थ्यशिष्यपाने रुक्मि
ण्यापहरणादिना चैद्य दृढाकृतवता कृष्णेन तस्मिन्नुदासितुमशक्यमिति विशेषे वक्तव्ये प्रस्तु

कु०न०
२२

तेतत्प्रत्यायनार्थं सामान्यमभिहितं यथा वा सौहार्दस्वर्णरेखाणामुच्चावचभिया पुर्णापरोक्ष
मितिकोप्यस्तिपरीक्षानिकषोपलः अत्र यदिवं प्रत्यक्षं इव परोक्षेविमर्शमहितनाचरक्षितदान्त सुतम
सुहृदिति विशेषे वक्तव्ये तेन प्रस्तुते सामान्यमभिहितम् विशेषनिबंधनायथा अंगाधिरोपितस्रगा
प्यनुमास्रगालाक्षनः केसरीति प्रस्तुते मस्तगापृथ्वीस्रगाधिपः अत्र रूक्षं प्रतिवल्लमदृस्यवाक्षेमादवरूप
णापरे पूर्वप्रस्तावनानुरोधात्क्रूरएव ख्यातिभाभवविन तुमदुरिति सामान्ये वक्तव्ये तत्प्रत्यायनार्थम
प्रस्तुते विशेषोभिहितः एवं हृत्कथादिषुद्विषुसामान्यतः कंचिदर्थं प्रस्तुतस्य तद्विवरणार्थमप्रस्तु
तरूपाविशेषोदाहरणोक्तिप्रयमेवाप्रस्तुतप्रशंसाद्रष्टव्या कारणानिबंधनायथा दृष्टतसारमिवेन्दुमं
डलंदमयंतिवदनायवेधसा कृतमध्यबिलं विलोक्यते तांभीरखनीरवनीलिमा अत्रापाकरणीकेन्दुमंड
लात तयोरत्रेक्ष्यमाणेन दमयन्तीवदननिर्माणार्थं सारांशहरणेन कारणेन तत्कार्यरूपोवर्णनीयतयाप्र
स्तुतोदमयन्तीवदनगतोलोकोत्तरसौन्दर्यविशेषः प्रतीयते यथावादासहीयेवरदराजस्तवे अप्रस्तुत
ननमसनधुतयः यदंतेदेहक्षयोपनतदिव्यपदाभिमुखाः लावण्यपुण्यनिचयं सुहृदित्वदास्यबिम्ब राम०
२२

स्य यात्रिमिहिरं प्रतिमासभिन्नाः अत्राप्राकरणिकचन्द्रगततयोत्प्रेक्ष्यमाणेन लावण्यपुण्यनिच
यविन्यासेनकारणेन तत्कार्यमनन्तकोटिचन्द्रलावण्यशालित्वमनन्यमुखसाधीरणांभान्मुखेवर्णनीया
वण्यपुण्यनिचयविन्यासेनकारणेन तत्कार्यमनन्तकोटिचन्द्रलावण्यशालित्वमनन्यमुखसाधीरणांभ
ान्मुखेवर्णनीयतयाप्रस्तुतं प्रतीयते तथाहि चन्द्रस्तावन्नवीनावोभवतीतिमन्त्रलिंगात् व्यक्तिभेदाभ्यां
भेदाध्यवसायाद्प्रतिमासंप्रभिन्नत्वेन वर्णितः तेनातीतानन्तचन्द्रा अनंतकोटय इति लब्धं कालस्यानादित्वा
त्सर्वेषां च तेषां माकारस्त्वयास्याः श्रेयमहिम्नाभगवद्ब्रुरणासमाश्रयत्वेनाध्यवसितं भगवद्ब्रुरणाप्र
पन्नानां वदेहस्थयोपास्थितो परमपदप्राप्त्यभिमुखं तदानीमेव स्वसुकृतस्वकीयस्तोमनिवेशनं ततः सूर्य
मंडलप्राप्तिश्रुत्येत सर्वश्रुतिसिद्धमिति तदनुरोधेन तेषां देहस्यकालस्यामावास्यारूपस्योपस्थितो सूर्यमं
डलप्राप्तिः प्राक्प्रत्यक्षसिद्धं पुण्यत्वेन निरूपितस्य लावण्यस्य ग्रहणानिमितीकृत्य तस्य चन्द्रस्य हृदयरूपो
पचरितत्सौहार्दवति भगवन्मुखेन्यसनमुत्प्रेक्षितं यद्यपि सुहृद्द्रुत्वेतावतस्वल्पपुण्यसंक्रमणां भवति

कुन°
१४

तथाप्यत्र मुखेन्दुरित्येकवचनेन भगवन्मुखमेव चन्द्रस्य मुखत्वमुक्तं तेन मुखान्तराणि चन्द्रसादृश्यादन्यस्वा
प्यभावादिति॥ भगवन्मुखस्येतरमुखेभ्यो व्यतिरेकी वर्जितेस्तत्र अन्यस्मिन्नेव सर्वेषां चेन्दूनां स्वस्वलावण्यवि
न्यासेनोत्प्रेक्षणेन वार्तितः॥ प्रस्तुतोऽर्थः स्पष्टमेव प्रतीयते॥ यद्यप्यत्रौ सर्वप्रास्यनेतरविरजानघातिक्रमणानेतरमे
वसहहस्त सुवर्णस्तोमतः संक्रमणात्प्रयते॥ तथापि शारिकाशालेतस्यार्थवृशात्प्राग्भावः स्थापित इति तदनुसारेण
विन्यस्य मिहिरं यांतीत्युक्तं कार्यनिबंधनापथा॥ नाथ त्वदंघ्रिपवनवं खयानतोपलग्नास्तत्कांतिलेपकालि
कां त्रषिप्रविष्टाः॥ ता एवं तस्य मथनेन नवनीभवं यान्नं समुद्रनवनीतपदे प्रयन्नाः॥ अत्र भवगत्या तांबुजस्था
लिनलं दृशाकातोपहृपायांदिव्यसरित्यलक्ष्वकरसादिवल्लग्नानां नयासे हसमुप्रविष्टानां नवकांतिलेशस्थि
कानां परिणामतया संभाव्यमानेन समुद्रनवनीतपदवाच्येन चंद्रेण कार्येण तन्नवकांत्युत्कर्षः प्रतीयते॥ य
थावा॥ अस्याश्च दृति सौकुमार्यमथुना हे सस्य वैगवेरत्नं संल्लापोयदितत्र सा व्यतापरम्भ तैर्वाचं यमं संप्रत॥
अंगानामकठोरतायदि दृषत्प्रायैव सा मालती कांतिश्चेत्कमलाकिमत्र बहुना काषायमालंबतां॥ अत्रनायिका
गत्यादिषु वर्णनीयत्वेन प्रस्तुतेषु हंसादिगवेशांत्यादिरूपाणां ये चित्येन संभाव्यमानानि कार्याणि अमेयाणि हिता राम°
२८

उर   दर थिर

निएतानि च पूर्वोदाहरणादिवन वस्तु कार्याणि किंतु तन्नभ्रिरीशत्वकार्याणि॥ लज्जातिरश्चांपदि चेतसि स्पाद द
सं शपंपर्वतरात्रेपुन्त्राः॥ तं केशपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिखिलिं च मर्याः॥ इत्यादावुदाहरणांतरे तथैव
उनि स्पष्टं॥ अंगानामकठोरतेत्यत्र पयादेनुवर्णनीयांगसौकुमार्यातिशयनिरीक्षणाकार्यत्वमपि नार्थात्स्प
४व मालतीकठोरत्वविशिष्टतया तिपोजिविरोधायेक्षकठोरत्वस्य तत्कार्यत्वात॥ किंतु तदुद्देशे वेदमपितत्के
गमार्दवदृषदित्यादि उदाहरणे तथैव स्पष्टं॥ अर्थस्य कार्यत्वं त्वबुद्धेः कार्यत्वेऽपि कार्यनिबंधनत्वेन
हीयन इति नादृशान्यपि कार्यनिबंधनाप्रस्तुतप्रशंसायां उदाहृतानि प्राचीनैः॥ वस्तुत इतरेषांपि नदो
षः॥ न ह्यप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति नियंतुं शक्यते॥ संबंधांतरेष्वपि तद्दर्श
नात॥ यथा॥ तापत्रयौषध एवरस्य तव स्मितस्य निश्वासमंदमरुता निसीकृतस्य॥ एते कडंकडं इत्यादि इव वि
चिपुष्करीणांजेवात्कस्य किरणा जगति भ्रमंति॥ अत्र ह्यप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितस्य
द्वियोगस्य धान्यविशेषकडंकरं च यत्वोत्प्रेक्षणेन भगवन्मंदस्मितस्य तत्सारोगता सःकोप्युत्कर्षः प्रती
यते॥ न च धान्यकडंगरस्य योः कार्यकारणभावादिसंबंधोऽस्य ततस्तद्गीतप्रस्तारस्यकिमपि संबंधांतरमाश्रयणी

कुवलयानंद
२५

या॥ एवमुपमानोपमेयावाश्रित्य तत्र कविकल्पितकार्यकारणभावनिबंधनेऽप्रस्तुतप्रशंसे दर्शिते ततोन्यत्रापि
दृश्यते॥ यथा॥ कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रोर्मे नर्मदाहं त्वमपि वदसि मे ना
म कस्मात्सपत्न्याः॥ मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समज
नि कुपितः कुंतलक्षोणिपालः॥ अत्र किमासां समजनीति मालवीनां तथारोदनस्य निमित्ते पृष्टे पति
मरणरूपं निमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमिति कारणनिबंधना
मालवान्प्रति प्रस्थितेन कुंतलेश्वरेण किं भग्ना निर्जिता इति पृष्टे तदनंतरभावि लज्जनिर्वीनमेदाप्रश्नोत्तर
रूपं कार्यमभिहितमिति अत्रैव कार्यनिबंधनापि॥ पूर्वस्यां प्रश्नः शाब्दः अस्यामार्थ इति भेदः॥ प्रस्तुतेन प्र
स्तुतस्य द्योतने प्रस्तुतांकुरः॥ किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया॥ यत्र प्रस्तुतेन वर्ण्यमानेनाभिमत
मन्यत्प्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरोलंकारः॥ उत्तरार्द्धमुदाहरणं॥ अत्र प्रियतमेन साकमुद्याने विहरं
ती काचिद्भृंगं प्रत्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं॥ न चानामंत्रणमत्तणोनिर्वाच्यासंभवात्प्रस्तुतमेव वा
च्यमिह सरूपप्रस्तुतावगतये निर्दिष्टमिति वाच्यं॥ मोत्वादिनाभंगासावस्यमेत्रणास्य लोके दर्शनात॥ य राम॰
२५

था॥ कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते॥ वामेनात्र वटस्तमध्व
गजनः सर्वात्मना सेवते न च्छायापि परोपकारकरिणी मार्गस्थितस्यापि मे॥ इत्यत्र चेतनाचेतनप्रश्नोत्तरस्यानुपपत्त्या मत्र
रास्यात्यसंभावितत्वाभावात्॥ एवं प्रस्तुतेवाच्येन भंगोपालंभः पैलापन्याः कुलवध्वाः सौंदर्याभिमानशालि
न्याः क्रूरजनपरित्यक्ति दुःखप्रकर्षोपालंभस्य प्रतापनयाः कुलवध्वाः सौंदर्याभिमानशालिन्याः क्रूरजनपरि
त्यक्ति दुःखप्रकर्षोपायरवनितायां विट सर्वस्वापहरणासक्तत्वपुरासदायां कटकसंकुलकेतकीवल्लयां प्रिय
तमे पुत्तुपालंभो द्योत्यते॥ अन्यासु तावदुपमर्दसहासु भृंग लोलं विनोदय मनः सुमनोलतासु
बालामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नवमल्लिकायाः॥ अत्राप्युद्यानमध्ये चरंतं भृंगं प्रत्यु
पमुपालंभ इति वाच्यार्थस्यापि प्रस्तुतत्वं॥ इदं च प्रौढांगनासु विद्यमानासु बालिकां रतये प्रेरयति कामिनि
प्राप्यवति रहस्याश्चिह्लिद्रव्याया वचनमिति तं प्रत्युपालंभो द्योत्यते॥ यथा वा॥ कोशं द्वंद्वमियं दधाति नलिनीका
दंबचंचुक्षतं धत्ते च तल्लता नवं किसलयं पुंस्कोकिलास्वादितं॥ इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घि
कापालित्वेलांतेन तिरोदधे सत्वनटं बिंबाधरं पाणिना॥ अत्रोपमिति नलिनी यत्किंविशेषणनिर्देशेन दीर्घिका

कुवलयानंद
२६

पात्तदुत्पमेनवाच्यार्थस्यप्रस्तुतत्वंस्पष्टं।अप्रस्तुतांतद्धोरघ्रेतमेवचस्वयमेवकविनाविस्तृतमस्तत्तार्द्धे॥अत्राघो
दाहरणयोरप्यपदेशाख्यनिमाहलोचनकारः॥अप्रस्तुतप्रशंसायांवाच्यार्थोऽप्रस्तुतत्वावर्णनीयप्रतीतिम
भिव्यायाप्यपर्यवसितायांतेनस्तुतार्थव्यक्तिरलंकारः॥इहस्तुवाच्यस्यप्रस्तुतत्वेनतत्रावाच्यापर्यवसितायोअ
र्थसौंदर्यबलेनाभिमतार्थव्यक्तिर्ध्वनिरेवेति॥रस्तुतस्त्वयमलंकारोनध्वनिरितिव्यवस्थापितेचित्रमीमांसायां॥तत्र
पोदाहरणस्यत्वलंकारत्वेनकस्यापिविवादः॥उक्तंहिध्वनिकृता॥शब्दार्थशक्त्याक्षिप्तोपिव्यंग्योर्थःकवि
नापुनर्यत्राविष्क्रियतेस्वोक्त्यासैवान्यालंकृतिर्ध्वनेरिति॥एतानिसादृश्यनिबंधनान्युदाहरणानि॥संबंधांत
निबंधनान्यपिकथंचिद्वाच्यव्यंग्ययोःप्रस्तुतत्वलंभनेनोदाहरणीयानीतिदिङ्मात्रमुदाहृयते॥तत्र
शिवाकांचनसन्निधौतौविलोचनेनाप्नुतस्तप्रमत्तौ॥समानधर्माणुवयोःसकाशेसखाभवित्पचिरंराव
थितः॥अत्रशिवसादृश्यमितिहेकदेशतपातञ्चाचंमालत्नोचमनपिशिवरात्रिमाहात्म्यप्रयुक्तत्वेनवर्ण
नीयमितितन्मुखेनकृत्स्नेशिवसादृश्यं॥यथावा॥वहंतीसिंदूरंप्रबलकबरीभारतिमिरात्त्विषांवृंदैर्वंदी
कृतमिवमिनवीनार्ककिरणं॥तनोतुक्षेमंनस्तववदनसौंदर्यलहरीपरीवाहस्रोतःसरणिरिवसीमंतसर राम॰ २६

णि॥अत्रवर्णनीयत्वेनप्रस्तुतायाःसीमंतसरणेर्वदनसौंदर्यपरीवाहत्वोत्प्रेक्षणेनपरिस्फुरिततद्रूपस्यपरीवाहा
रीभूतास्वसौंदर्यमितीवदनसौंदर्यसमृद्धिःप्रतीयतेसापिवर्णनीयत्वेनप्रस्तुतैव॥यथावा॥अंगासंगिमृणाल
काण्डमयतेगाविशेषाद्दृचंनासामौक्तिकमिंदुनीलमभूंसरणीयासानिलाह्राहते॥दन्तोयंहिमवालुकापिकुचयो
र्वत्तेस्वरांदीयतांतूसायत्यतितांबुवंत्करतलेधारांबुसंलीयते॥अत्रनायिकायाविरहासत्वातिशयप्रकटन
यसंतापवत्त्वकार्याणिमृणालम्लान्यादीन्यपिवर्णनीयत्वेनविवक्षितानीतितन्मुखेनसंतापोऽवगम्यः
यत्रकार्यमुखेनकारणस्यावगतिरपितिवदुत्तत्रनायमलंकारः॥किंत्वनुमानमेव॥यथा॥यस्मिन्नानंपा
नस्तनवद्रवनसंगामयतस्तनोर्मध्यस्यातःपरिमलनमप्राप्यहारितं॥इदंव्यस्तन्यासंप्रशिथिलभुजाक्षेप
लनेकृशांग्याःसंतापंवदतिनलिनीपत्रशयनं॥तुनप्रस्तुतकार्याभिधानमुखेनकारणगम्यत्वमपिप्रस्तु
तांकुरविशाखयस्यैल्लिंनार्हःपर्यायोक्तमित्यपांकाशामाह॥पर्यायोक्तंतुगम्यस्यवचप्रतिपादनेचामंगंतरेणविवक्षि
तरूपादपिवाग्गतरेकेनचित्तरूपांतरेणाभिधानंपर्यायोक्तं॥उत्तराद्धमुदाहरणं॥अत्रभगवान्वासुदेवःस्व
धारणारूपेणागम्यः॥राहुवधुकुचवैयर्थ्यकारकत्वेनरूपांतरेणासएवाभिहितः॥यथावा॥लोकंपश्यतियस्यां

त्रिःसप्तं स्यां त्रिंनयश्पति॥ ताभ्यामभ्यंतरे छेघायघाविष्णुगुरोस्तव॥ अत्र गौतमः पतंजलिश्च॰ सास्वोदार
रांत्वाभ्यां गम्यौ रूपांतरेणाभिहितौ॥ यथा वा॥ निचेचतां हंत समाययतौ शिरीषकोषम्रदिमाभिमानं॥ पादौ
क्रियद्दूरमिमौ प्रयासेनिधित्सातेतदुच्चैर्दयं मनस्तो॥ अत्र किंपदुरंजिगमिषेति गम्य एवार्थो रूपांतरेणाभिहि
ष्या वा॥ त॥ देवं वदेत्तल्लषिशारघिदेवता सार्वभौमं व्यासप्रेमा भुवनविदिता यस्य वाहाधिवाहाः॥ भवायेटीभु
वनमध्यरपुष्करं पुष्यवाटीशाटीपालाः शातमखमखोन्मंदनधिवाहाः॥ भवायेटीभुवनमध्यरपुष्करं पुष्य
वाटीशाटीपालाः शातमखमखोन्मंदनदुर्मनोभः॥ अत्र यस्य वेदा वाहा भूतंगमा भवणानीत्यादितत्त
द्वाक्यार्थस्य व्यवस्थितौ वेदत्वाघाकारेण गम्या एव वेदादयो या सप्रमुखविभेषत्वाकारेणाभिहिताः॥
परंतु देवता सार्वभौमत्वस्फुटीकरणाय विशेषणविशेष्यभावव्यत्यासेन प्रतिपादिताः॥ अलंकारसर्वस्व
कृता पर्यायोक्तस्य संप्रदायागतमिदमेव लक्षणं अंगीकृतं॥ गम्यस्यापि भंग्यंतरेणाभिधानं पर्यायोक्तमि
ति॥ चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य॥ आलिंगनोद्दामविलासवंध्यं रतोत्सवं चुं
बनमात्रशेषमिति प्राचीनं तदुदाहरणमन्यथा योजितं राहुवधूगते विशिष्टे नरतोत्सवे नराहुशिरःशे

द्धकारणारूपो गम्यत इति॥ एवं च गम्यस्यैवाभिधानमिति लक्षणानुपपत्तिमाशंक्य गम्यस्यैवाभिधानायोगात्का
र्योद्दिष्टे कारणेनाभिधाने लक्षणे विवक्षितमिति लक्षणमपि क्लिष्टगत्यापादितं॥ लोचनकृता पर्यायोक्तस
द्भन्येन प्रकारेणाभिधीयत इति इदमेव लक्षणमंगीकृत्य तदुदाहरणे लोचकार्येण शब्दाद्गमितेन कारणं
व्यंग्यसम्यक्प्रदर्शिते त्तल्लक्षणे लक्ष्यमपि च क्लिष्टगत्यायोजितं॥ वाच्यादन्येन प्रकारेणायं व्यंग्येनोपलक्षि
तस्य च द्रभिधीयत इति पर्यायेण प्रकारांतरेण व्यंग्येनोपलक्षितमुक्तमिति सर्वोप्ययं क्लेशः किमर्थमिति
न विद्मः॥ दर्शितानि हि गम्यस्यैव रूपांतरेणाभिधाने बहूधान्युदाहरणानि चक्राभिघातप्रसभाज्ञयैवेति प्राची
नोदाहरणमपि स्वरूपेण गम्यस्य भगवतो रूपांतरेणाभिधासंभवात्तानयोजनमेच॥ यत्तु अत्र राहुशिरश्छे
दगमनं तत्र प्रागुक्तरीत्या प्रस्तुतांकुर एव प्रस्तुतेन राहोः शिरोमात्रावशेषेणालिंगनवंध्यत्वापादनरूपवाच्ये
भगवतो रूपांतरेणोपपादिते भगवद्रूपेणावगमनं पर्यायोक्तस्य विषयः॥ पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्ट
साधनं॥ यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह॥ अत्र नायिकां नायकेन संगमय्य तत्सखीनां दर्शनव्याजेन
गच्छंत्याः सख्या तत्त्वावच्छेदसंपादनरूपेष्टसाधनं पर्यायोक्तं॥ यथा वा॥ देहि मत्कंदुकं राधे परिधाननिगूहि

तां रतिवित्तं सयत्नावीतस्याः कृतो मन्देस्तु कः॥ पूर्वत्र परेषु साधनमत्रचंदुकसम्भाव शोध्यनार्थनीयाविस्तं
सनव्याजेत्वेन षु साधनमिति भेदः॥ व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः॥ कः स्वर्धुनि विवेकस्ते पापि
नो नयसे दिवं॥ साधु दूति पुनः साधु कर्तव्यं किमतः परं॥ यन्मदर्थे विलूनासि दंतैरपि नखैरपि॥ निंदया स्तुतेः॥
स्तुत्या निंदाया वा अवगमनं व्याजस्तुतिः॥ कः स्वर्धुनीत्युदाहरणे विवेको नास्तीति निंदाव्याजेन गंगा स्तू
तिव देवमहापातकिनोपि स्वर्गं नयतीति व्याजरूपया निंदया तत्प्रभावातिशयस्तुतिः॥ साधु दूतीत्युदा
हरणे मदर्थमिपं तत्केशयामनुभूतवत्यसीति व्याजरूपया स्तुत्या मदर्थे न गतासि किंतु रंतुमेव गतासीति
कतां दूतिकाधर्मविरुद्धकारित्वमिति निंदावगमनम्॥ यथा वा॥ स्तेशौर्यमहोपोद्भवत्येवं सत्यपि मास्थिते॥
सापसत्यपि समारूढामवंति पारं पंथिनः॥ अद्वंद्वानववैरिणा जरिणापाप्यर्द्ध शिवस्याहं तं देवेभ्यं जगतीतले
स्मरहरा भावे समुन्मीलति॥ गंगा सागरमंबरं शशिकला नागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां
मां च भिक्षाटनं॥ अत्राद्योदाहरणे सत्पक्षपदगतश्लेषमूलनिंदाव्याजेन स्तुतिर्गम्यते॥ द्वितीयोदाहरणे स
र्वज्ञ सर्वेश्वरोसीति राज्ञः स्तुत्या व्याजरूपया मदीयवैदुष्यादि हारिद्र्यादि सर्वज्ञानन्तापि बहुप्रदानेन रक्षितं रामः
१८

राज्ञोपि मत्सकाशे किमपि न ददासीति निंदा व्यज्यते॥ सर्वमिदं निंदास्तुत्योरेकविषयत्वे उदाहरणं॥ भिन्नवि
षयत्वे निंदया स्तुत्यभिव्यक्तिर्यथा॥ कस्त्वं वानर रामराजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः
स हनुमान्निर्दग्धलंकापुरः॥ बद्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः सव्रीडं तत्पराभवोव
नमुखः कुत्रेति न ज्ञायते॥ अत्र हनुमन्निंदया तदितरस्तावानरस्तुत्यभिव्यक्तिः॥ स्तुत्या निंदाभिव्यक्तिर्यथा॥
यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न तान्प्रत्याशया धावसि
॥ काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किं नाम तप्तं तपः
अत्र हरिणस्तुत्या राजसेवानिर्विण्णस्यात्मनो निंदा व्यज्यते॥ अयमप्रस्तुतप्रशंसाविशेषरूपत्वमलं
कारसर्वस्वकारः॥ तेन हि सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणान्न नरवैवमन्येशतापि दृश्यते॥ यथा॥ ध
न्याः खलु वने वाताः कह्लारस्पर्शशीतलाः॥ राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः॥ अत्र वाता धन्या इ
त्यप्रस्तुतार्थादहमधन्य इति वैधर्म्येणाप्रस्तुतार्थः प्रतीयत इति व्युत्पादितं॥ इयमेवाप्रस्तुतप्रशंसा
न कार्याकारणनिबंधनेति दंडी॥ अत्राप्रस्तुतप्रशंसास्याप्रदकांडे तया स्तुतिः॥ सुखं जीवंति हरिणा वनेष्व

कुवलयानंद
२९

परसेविनः॥ अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः॥ सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते॥ राजानुवर्त्तनक्लेशनिर्वे
देनमनस्विनेति॥ वस्तुतस्त्वत्र व्याजस्तुतिरित्येवयुक्तं स्तुत्या निंदाभिव्यक्तिरप्रस्तुतप्रशंसातो वैचित्र्यवि
शेषसद्भावात्॥ अन्यथाप्रसिद्धव्याजस्तुत्युदाहरणेष्वप्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे
गम्येते इत्येताप्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात्॥ एवं चानया प्रक्रियया अत्रान्यगतस्तुतिविवक्षया
न्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव॥ व्याजेनान्यस्तुतिरित्यर्थावगमसद्भावात् यथा॥ शिख
रिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः॥ तरुणि येन तवाधरपाटलं दशति बिंबफलं शुक
शावकः॥ अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते॥ निंदाया निंदया व्यक्तिर्व्याज
निंदेति गीयते॥ विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः॥ अत्र हरनिंदया विषयविपाके संसारप्रवर्त्तयतो वि
धेर्निंदाभिव्यंग्या व्याजनिंदा॥ यथा वा॥ विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवापराधः॥ सहकारतरौ चका
र यो सहवासं सरलेन कोकिलेन॥ अन्यस्तुत्या अन्यस्तुत्यभिव्यक्तिरिति पंचमप्रकारव्याजस्तुतिर्द्दृष्टा तथैव व्या
जनिंदा॥ ननु यत्रान्यनिंदयान्यनिंदा अन्यनिंदाया च प्रतीतिस्तत्र व्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमेस्तु राम० २९

त्या अन्यस्तुतिरन्यनिंदारूपाप्रस्तुतप्रशंसोदाहरणेष्वप्रस्तुतप्रशंसा न वक्तव्या॥ तेषु यथापि व्याजस्तुतिव्याजनिंदाभ्यां
कोडीकारसंभवादिति चेदुच्यते॥ यत्राप्रस्तुतवृत्तांतात्स्तुतिनिंदारूपात्तत्सरूपः प्रस्तुतवृत्तांतः प्रतीयते॥ अंत
श्छिद्राणि भूयांसि कंटका बहवो बहिः॥ इत्यादौ तत्र खलव्यवहारसारूप्यनिबंधनाऽप्रस्तुतप्रशंसाऽपि वर्त्त
मानानन निवारयितुं शक्या॥ अन्यस्तुत्याऽन्यस्तुतिरन्यनिंदयान्यनिंदेत्येवं व्याजस्तुतिव्याजनिंदे अपि संभ
वतश्चेत्॥ कामं ते अपि संभवेतां॥ न च स्यात्परित्यागः॥ यथापि विधिरेव विशेषगर्हणीय इति श्लोके विधिनिंद
यात्र कलकाकनिंदया चाविशेषज्ञस्य प्रभोस्तेन च विद्वत्समतया स्थापितस्य मूर्खस्य च सानिंदापि प्रतीयते
इति सारूप्यनिबंधनाप्रस्तुतप्रशंसाप्यस्ति तथापि सैव व्याजनिंदा मुख्येति प्रथमोपस्थिता सापि तत्र दुर्वारा॥
एवं च व्याजनिंदामलंकव्याजनिंदांसे सेयमप्रस्तुतप्रशंसे चमत्कारातिशयः॥ एवमेव व्याजस्तुतिमलंकृ
व्याजस्तुतिरूपाप्रस्तुतप्रशंसा दृश्यते॥ यथा॥ लावण्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः स्वच्छंदच
रतो जनस्य हृदये चिंताज्वरो निर्मितः॥ एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता कोर्थश्चेतसि वेधसा
विनिहितस्तन्वीमिमां तन्वता॥ अत्राप्रस्तुतायास्तरुण्याः सृष्टिनिंदाव्याजेन तन्निंदाव्याजेन च तत्सौंदर्यप्रशं

साप्रशंसनीयत्वेन कविविवक्षिता याःस्वकवितायाःश्लेषनिर्व्याजेन तन्निस्तव्यं जेन च श्रायेद्यपि नात्यंतसामंज
स्येन ह्रीमो विकल्पा वीतरागस्येति कल्पयितुं शक्यंते ॥ रसानुगुणत्वात्पीतरागहृदयस्य एवं विश्वविशायेद्य
प्रवृत्तेश्च ॥ नायिकाविरागिणा रतिर्युज्यते ॥ तृतीयविकल्पेषु वराकीति कृपणतालिंगितस्य हते तस्य भंगालोपहतस्य
वचसोऽनुचितत्वात् ॥ तुल्यरमणाभावादित्यस्यांत्यंतमनुचितत्वाच्च ॥ स्वात्मनि तत्तद्रूपत्वासंभावनायाम् वि
रागित्वे हि पश्चात्तापता स्यात् ॥ तथापि विवक्षितप्रस्तुतार्थपरतायां च किं दृसामंजस्यं ॥ अत एवास्य श्लोकस्या
प्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः ॥ वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपत्तेरिति ॥ आक्षेपः स्वयमुक्तस्य प्रति
षेधो विचारणात् ॥ चंद्रसंदर्शयात्मानमथवास्तिप्रियामुखं ॥ अत्र प्रार्थितस्य चंद्रस्य प्रियामुखस्य
त्वेन कैमर्थ्यं विचार्यार्थ्यत्वेत्यादिरूपचित्तः प्रतिषेध आक्षेपः ॥ यथा वा ॥ साहित्यपाथोनिधिमंथनोत्थं
कर्णामृतं रक्षत हे कवींद्राः ॥ यदस्य दैत्या इव लुंठनाय काव्यार्थचौराः प्रगुणीभवंति ॥ गृह्णंतु सर्वे यदि
वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणां ॥ रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः ॥ अत्र
प्रथमश्लोकेन प्रार्थितस्य काव्यार्थचौरेभ्यो रक्षितव्यत्वस्य स्वोल्लिखितवैचित्र्याराणसमुद्गत

रत्नाकरवद्दूष्यत्वं विचिंत्य प्रतिषेध आक्षेपः ॥ निषेधमाभासमाक्षेपं बुधाः केचन मन्वते ॥ नाहं दूती तनोस्ता
पस्तस्याः कालानलोपमः ॥ केचिदलंकारसर्वस्वकारप्रभृतयस्त्वामाहुः ॥ न निषेधमात्रमाक्षेपः ॥ किं तु
यो निषेधो बाधितः सन्नर्थांतरं पर्यवस्यति ॥ किंचिद्विशेषमाक्षिपति स आक्षेपः ॥ यथा दूत्या उक्तौ नाहं
दूतीति निषेधो बाधितत्वादाभासरूपः सद्घटनकालोचितकैतववचनपरिहारेणामरेहारेणाय याथार्थ्य
वादित्वे पर्यवस्यन्विरहाग्नी मे वागतापि को जीवनीयेति विशेषमाक्षिपति ॥ यथा वा ॥ नरेंद्रमौले न वयं राज
संदेशहारिणः ॥ जगत्कुटुंबिनस्तेस्य च नः श्रुत्वं किंचिदिष्यते ॥ अत्र संदेशहारिणामस्माकं न वयं संदे
शहारिण इति निषेधोऽनुपपन्नः संधिकालोचितदैत्यवचनपरिहारेण याथार्थ्यवादित्वे पर्यवस्यन्
वैजगतीपालन क्वचिदपि शत्रुभावेनावलोकनीयः किंतु सर्वैपि राज्ञा नो मत्पभावेन संरक्षणीया इति वि
शेषमाक्षिपति ॥ आक्षेपोन्यो विधौ व्यक्ते प्रतिषेधे तिरोहिते ॥ गच्छ गच्छसि चेत्कांत तत्रैव स्याज्जनि
र्मम ॥ अत्र गच्छेति विधिर्व्यक्तः मा गा इति निषेधस्तिरोहितः ॥ कांतोद्देशेन जन्मप्रार्थनया त्वत्प
मरणसूचनेन गर्भितः ॥ यथा वा ॥ न चिरं मम तापाय तव यात्रा भविष्यति ॥ यदि यास्यसि यातव्यमलमा

कुवलयानंदः
३१

पाकंपापिनि॥ अत्राविन चिरंममतायायेति स्वस्य मरणसूचनेन गमननिषेधोऽर्पितः॥ आभासत्वे विरोधाभा
सदूष्यते॥ विनापि तन्विहारेण वक्षोजौ तव हारिणौ॥ अत्र हाररहितावपि हारिणौ हृद्याविति श्लेषमूलको
विरोधाभासः॥ यथा वा॥ प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्ततोज्झिता॥ अमित्रजिन्मित्रजिदोजसा
स यद्विचारदृक्चारदृगप्यवर्तत॥ अत्र विरोधसमाधानोत्प्रेक्षाशिरस्को विरोधाभासवृत्तिपवसमाप्तम्
॥ विभावना विनापि स्यात्कारणं कार्यजन्म चेत्॥ अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयं॥ अत्र लाक्षा
रससेकाभावेऽपि रक्तिमा कथिता॥ स्वाभाविकत्वेन विरोधपरिहारः॥ यथा वा॥ अपीतक्षीबकादंबमसंमृ
ष्टामलांबरं॥ अप्रसादितशुद्धांबु जगदासीन्मनोहरं॥ अत्र पानादिप्रसिद्धहेत्वभावेऽपि क्षीबतादिनिव
द्धम्॥ विभाव्यमानशरत्समयहेतुकत्वेन विरोधपरिहारः॥ यथा वा॥ वरतनुकवरीविधायिना सुरभिनव
नवरेदूंयातिना॥ अवाचितकुसुमापि वल्लरी समजनि नाविलीनषट्पदा॥ वल्ल्याः पुष्पाभावेऽपि भृंगालिंग
नं निबद्धं॥ अत्र वरतनुकबरीसंक्रांतसौरभभरयतिनवसंसर्गहेत्वंतरं विशेषणमुखेन दर्शितमिति वि
रोधपरिहारः॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः॥ अ

राम०
३१

त्र जगज्जये साध्ये हेतूनामस्त्राणामसमग्रत्वं तीक्ष्णत्वादिगुणवैकल्यं॥ यथा वा॥ उद्यानमारुतोद्धूत
चूतचंपकरेणवः॥ उदश्रयंति पांथानामस्पृशंतो विलोचने॥ अत्र बाष्पोद्गमने हेतूनां रेणूनामसमग्र
त्वं स्पर्शनक्रियावैकल्यं॥ इमां विशेषोक्तिरिति दंडी व्याजहार॥ यतः प्रथमोदाहरणे मन्मथस्य महिमाति
शयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकत्वातिशयरूपश्च विशेषः ख्यापित इति॥ अस्माभिस्तु ती
क्ष्णत्वादिवैकल्यमपि कारणवैकल्यरूपमिति विभावना दर्शिता॥ कार्योत्पत्तिस्तृतीया स्यात्सत्यपि
प्रतिबंधके॥ नरेंद्रानेव ते राजन् दशत्यसिभुजंगमः॥ अत्र नरेंद्रा विषवैद्याः सर्पदंशप्रतिबंधक
मंत्रौषधिशालिनः शौर्येण गृहीता इति सत्यपि प्रतिबंधके कार्योत्पत्तिः॥ यथा वा॥ चित्रं तपति राजेंद्र
प्रतापतपनस्तव॥ अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणं॥ अकारणात्कार्यजन्म चतुर्थी स्याद्विभा
वना॥ शंखाद्वीणानिनादोऽयमुदेति महदद्भुतं॥ अत्र शंखत्वेन कामिनीकंठनालं तंत्रीनाद
त्वेन गीतं चाध्यवसीयते इति अकारणात्कार्यजन्म॥ यथा वा॥ तिलपुष्पात्समायाति वायुश्चंदनसौ
रभः॥ इंदीवरयुगाच्चित्रं निःसरंति शिलीमुखाः॥ इति च॥ विस्तारः॥ विरुद्धात्कार्यसंपत्तिर्दृष्टा काचि

द्विभावना॥ शीतांशुकिरणास्तन्वीं हंत संतापयंति तां॥ अत्र तापनिवर्त्तकतया तापनिवर्त्तकतया तापविरुद्धैरिंदु
किरणैस्तापजननिरुक्ता॥ यथा वा॥ उदिते कुमारसर्गे कुवलयसमुल्लसति भाति न सरोजं॥ मुकुलीभवंति
चित्रं परराजकुमारपाणिपद्मानि॥ यथा वा॥ अविवेकि कुचद्वंद्वं हंतु नाम जगत्रयं॥ श्रुतिप्रणयिनोर
क्ष्णोरयुक्तं जनमारणं॥ पूर्वोदाहरणयोः कारणविरोधित्वं स्वाभाविकमिह श्रुतिप्रणयित्वरूपागंतु
कगुणप्रयुक्तमिति भेदः॥ कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना॥ यशःपयोधिरभवत्करक
ल्पतरोस्तव॥ यथा वा॥ जाता लता हि शैले जातु लतायां न जायते शैलः॥ संप्रति तद्विपरीतं कनकलता
यां गिरिद्वयं जातं॥ कार्याज्जनिर्विशेषोक्तिः सति पुष्कलकारणे॥ हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि॥
यथा वा॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः॥ अहो दैवगतिश्चित्रा तथापि न समागमः॥ असं
भवोर्थनिष्पत्तेरसंभाव्यत्ववर्णनं॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति॥ यथा वा॥ अयं वारामे
को निलय इति रत्नाकर इति श्रितोस्मा॥ भिस्तृष्णाकवलितमनोभिर्जलनिधिः॥ क एवं जानीते नि
जकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः॥ विरुद्धं भिन्नदेशत्वं कार्यहेत्वोर

संगतिः॥ विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः॥ ययोः कार्यहेत्वोर्भिन्नदेशत्वं विरुद्धं तयोस्तन्निबध्यमा
नमसंगत्यलंकारः॥ यथा विषपानमूर्छनयोर्भिन्नदेशत्वं॥ यथा वा॥ अहो खलभुजंगस्य विपरीतो वध्युपक्र
मः॥ अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते॥ क्वचित्संगतिसमाधाननिबंधनेन चारुतातिशयः॥ यथा वा॥ अ
जस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयां॥ श्वासान्स वर्षत्यधिकं पुनर्यत्ध्यानात्तव त्वन्मयतामवा
प॥ विरुद्धमिति विशेषणाद्यत्कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं॥ तत्र नासंगतिः॥ यथा॥ त्वच्चापवल्लीसमुखी
पाचन्त्रे यति वक्रतां॥ तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम॥ अन्यत्र करणीयस्य ततोन्यत्र कृतिश्च सा
॥ अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा॥ अपारिजातां वसुधां चिकीर्षन्द्यां तथाकृथाः॥ गोत्रोद्धारप्रवृत्तो
पि गोत्रोद्भेदं पुराकरोः॥ अत्र कृत्स्नप्रतिशक्रस्योपालंभवचने चिकीर्षितं तत्प्राङन्यत्र करणीयमपारिजातत्वं
दिवि कृतमित्येका संगतिः॥ पुरा गोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्धं गोत्राणां दलनं वज्रदलनैः कृ
तमिति द्वितीया द्विविधापि श्लेषोत्थापिता॥ यथा वा॥ त्वत्खड्गखंडितसपत्नविलासिनीनां भूषा भवंत्यभिनवा
भुवनैकवीर॥ नेत्रेषु कंकणमथो हृषु कंकणमथो हृषु पत्रवल्ली चोलेंद्रसिंह तिलकं करपल्लवेषु॥ मोहं जग

पयार्वे अभिलषाक्षिपदिदेव च कलक्ष्मीमृगाक्ष्याः सकलदपि पुलकरश्रीमकृत संस्पर्शात्तत्पावकं ॥ ५

कुवलयानंद ३३

त्वयमुवामयनेत्रमेतदाद्यायरूपमखिलेश्वरदेहभाजो ॥ निःसीमकांतिरसनीरधिनामुनैव मोहं प्रवर्द्धयसि मुग्ध
विलासिनीनां ॥ अत्रोदाहरणे कंकणादीनामन्यत्र करणीयत्वं प्रसिद्धमिति नोपन्यस्तं ॥ भवति ना भावना रूपा
न्यात्र हृतिराक्षिप्यते इत्येतदिति लक्षणानुगतिः ॥ विषमं वर्ण्यते यत्र घटनाननुरूपयोः ॥ क्वेयं शिरीषमृद्वंगी क्व ता
वपारिजातप्रसूनैः सुभरयवदनोच्चैर्मादनज्वरः ॥ अत्यंतिमृदुत्वेनाविदुःसहत्वेन चानिरूपयोरेनामदन
ज्वरयोर्घटनौ ॥ सुविमलमयाविवेयापारिजातप्रसूनैः सुभरयवदनाचेत्त्वेकात्तस्यामुखेन्द्र ॥ एवं शवस्त्व
सतिवदनाः ॥ अत्र चेंदुवदनलक्ष्मीस्तार्किता वटनेति भेदः ॥ विरूपकार्यस्योत्पत्तिरपरं विषमं मतं ॥ की
र्त्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ अत्र कारणगुणप्रक्रमविरुद्धश्यामायाधवलोत्पत्तिः ॥
•कार्यकारणयोर्निर्वर्त्त्यनिर्वर्त्तकत्वेपं चमी विभावना ॥ विलक्षणाप्रक्रमविरुद्धश्यामायाधवलोत्पत्तिः ॥
कार्यकारणयोर्निर्वर्त्त्यनिर्वर्त्तकत्वेपंचमी भावना ॥ विलक्षणगुणशालित्वे अपं विषमरितिभेदः ॥
अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् ॥ भक्ष्याशया हिमंजूषां दष्टाखुलेन भक्षितः ॥ इष्टा
र्थमुद्दिश्य विचिकित्सितोऽख्वतः तेन केवलं भिष्टसानवाप्तिः ॥ किंतु तत एवानिष्टस्यापि प्रतिसं राम०
३३

मश्चेति विषमं ॥ यथा मसप्रेक्षपासर्वयष्ट्यादष्टाप्रविष्टस्य मृषस्य कन केवलं भक्ष्यालाभः ततस्तु किंस्व
रूपहानिरपि ॥ यथा वा ॥ गोपालं इति कृष्ण त्वेष्वबुरक्षा ॥ चां छया ॥ श्रितो मातुलतनसीरमप्यलभ्यं त्वपाकृतं ॥ इदम
थोवाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तिर्वानिष्टप्राप्तिर्नेमेचोदाहृतं ॥ अनर्थं परिहारपेष्टार्थसमुद्यमा
त्तदुभयं ॥ यथा दिविश्चित्तवतश्च द्वेषे हि केयम यानु वि ॥ शाशा स्थव श्यने न्वं यीजि साच पस्पतितो भरूपे ष्टार्थस
घमात्तदुभयं ॥ ॥ यथा दिघक्षम्मा रू तेर्वाल्लंतमादीप्य दशाननः ॥ आत्मीयस्य पुरस्यैव सद्योदहनमन्व
भूत् ॥ पुरस्यैवेत्येवकारेण परानिष्टप्राप्तेराभावो दर्शितः ॥ अनिष्टस्याप्यवाप्तिश्चेति श्लोके इष्टानवाप्तेरपि श
व्दसंगृहीततयाइष्टानवाप्तिश्चेति प्रत्येकमपि विषमपदेनान्वयः ॥ तत्र केवलानिष्टप्रतिलंभः ॥ केवलेष्टा
नवाप्तिश्चेत्यन्यदपि विषमद्वयं लक्षितं भवति ॥ तत्र केवलानिष्टप्रतिलंभो यथा ॥ यत्नात्तवत्रसिकेसरसं
ग्रहस्य किंकदमानिष्ठ शिवादिकायां ॥ कालः कालिजगदिदं न कृत ज्ञस्यित्वाहरिष्यतितव्रैवमुखस्यलक्ष्मीं
॥ अन्यपक्षात पत्रलिप्ययाय घ्रबीजानायं रूनवत्यात्तस्ता भोस्तेव किंतु मुखशोभाहरणरूपो त्कटानि
ष्टप्रतिलंभः ॥ केवलेष्टानवाप्तिर्यथा ॥ खिन्नोसि मुंच शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः ॥ भरभु

कुवलयानंदः
३४

गनवितबाहुगोषु वेषु हसन हरिर्जयति ॥ अत्र यद्यपि शैलस्योपरि पतनरूपानिष्टावाप्तिः प्रसक्ता ॥ तथापि भगव
त्करांबुजस्पर्शमहिम्ना सा च जातेति शैलस्याधारणाद्रूपेष्टानवाप्तिमात्रं ॥ यथा वा ॥ लोके कलंकमपहातुमयं
मृगांको जातो मुखं तव पुनस्तिलकच्छलेन ॥ तच्चापि कल्पयसि तन्वि कलंकरेखां नार्यः समाश्रितजनं हि कलं
कयंति ॥ अत्रानर्थपरिहाररूपेष्टानवाप्तिः ॥ यथा वा ॥ शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवतस्म
यिपातितोयं ॥ कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं दहनः करोति ॥ अत्र परानिष्टप्राप्त्ये
ष्टरूपेष्टानवाप्तिः ॥ स्वतोनिष्टस्यापि विनिशापस्य महापुरुषलाभावश्यंभावगर्भतयादृष्टार्थेनेष्टत्वेन स्वीकृतत्वा
त् ॥ पद्यकेन चित्स्वेष्टसिद्ध्यर्थं प्रेषितेनान्येन नियोक्तुरिष्टमुपेक्ष्य स्वस्यैवेष्टं साध्यते तत्रापीष्टानवाप्तिरूपमे
व विषमं ॥ यथा ॥ दूतीं तस्मिन्नेव लयं गता ॥ सख्यः पश्यत मौग्ध्यमेतया का चा विधेरम्यं ॥ तस्मिन्नेव च लयं गते
निरतपानाय केसा द्वैचंदर्शितं ॥ यथा वा ॥ नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ॥ तत्तत्रैव रमते हताः पाणि
निनावयं ॥ एतानि सर्वथैवेष्टानवाप्त्युदाहरणानि किंचिदिष्टावाप्तिपूर्वकं तदनवाप्तिर्यथा मदीये वरदरा
जस्तवे ॥ भानुर्निशासु भवदंघ्रिमयूखशोभालोभात्प्रतात्प्य किरणोत्करमाप्रभातं ॥ तत्रोद्गमेहृतवहात स्व

राम०
३४

राल्लपरागैस्तापं भज्ज्यनुदिनं सहिमंदतापः ॥ यथा वा ॥ त्वद्दृक्साम्यमपमेबुजकोशान्तरंगाक्षतं तस्युषमभिचक
रोलूकस्यापदवीं ॥ लब्धापि पश्चैरिति विधुः क्रमहीयमानः शंस्तनंतीत्युपचिनोति पमायुनोंशः ॥ अत्रार्थघो
के सार्थकिरणानां राविषमृतो प्रवेशनमागमसिद्धं ॥ सूर्यस्य निजकिरणेषु भगवत्पादराश्मिषु प्रेरस्यातं
हतेतेषामग्नेर्प्रतापं नं परिकल्पयते षाम्रदपकालदृष्टमरश्मिमांन्न चतयोद्वत्नानाग्न्नेर्नामिवाग्नि संताप
न प्रयुक्ता हरिमानुवत्निंपरिकल्प्य सूर्यस्य महता यियत्नेन तात्स्वालिकेष्टावाप्तिरेव ज्ञापतेन सार्वकालिके
ष्टावाप्तिरिति दर्शितं ॥ द्वितीयश्लोके चंद्रस्य भगवन्मुखलक्ष्मीमोहमानस्य सहत्वेन मित्रशापश्लेषवशा
त्स्यपरिकल्प्यतत्किरणस्य कमदलविकासकस्य चंद्रस्य प्रवेशं च सहतो भगवन्मुखलक्ष्मीनिधानमु
हकोशमुद्रामोचनपूर्वकं ततोंतर्हितं भगवन्मुखलक्ष्मीक्रस्यतया भगवन्मुखलक्ष्म्या चंद्रप्रसादनार्थं चं
द्रस्पर्शरूपं परिकल्प्य एतावतापि प्रयत्नेन यौगिमासस्यैव भगवन्मुखसाम्यैप्राप्त्यावाप्तिर्ज्ञापते ॥ न सार्वकालिकी
ति दर्शितं ॥ कृचिदिष्टानवाप्त्यावप्तितद्वाप्तिभ्रमनिवेधनं चिकित्सितिर्विशेषो यथा ॥ वल्मीकलक्ष्मीसीताहृतातान्त्व
द्दहितनगरे संचरं तीकिरातीकोणोन्यादौ परत्नान्युरुतरवदिरांगारबुद्ध्याकुलांगी ॥ क्षिप्त्वा श्वाखेछडंते तदुपरि

कुमुदलीमतनेत्रायमंतीश्वासामोदप्रसक्तैर्मधुकरभयटलैर्ध्वमशंकां करोति॥ अत्र प्रमत्ताभिसंपादनोद्योगान्त
कृतसंपादनालाभे पितल्लाभश्च मोपन्यासेन निबद्धः॥ समं स्यादर्हणं यत्र द्वयोरप्यनुरूपयोः॥ स्वानुरूपं कृतं स
द्म हारेण कुचमंडलं॥ प्रथमविषमप्रतिद्वंद्विदं समं॥ यथा वा॥ चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता॥ यन्निंबानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनक
लाकोविदः काकलोकः॥ पूर्वं स्तुतिपर्यवसायी इदं निंदापर्यवसायीति भेदः॥ सारूप्यमपि कार्यस्य कारणेन समं
विदुः॥ नीचप्रवणता लक्ष्मि जलजायास्तवोचिता॥ इदं द्वितीयविषमप्रतिद्वंद्वि समं॥ यथा वा॥ दव दहंति॥ य
था वा॥ आदौ हालाहलनहनभजादनहहस्ताव लंचोबाल्ये शंभोर्नीटिलमहसा बवद्धमैत्री निरूढः॥ प्रोटोहोद
पि सखविदिधेयैत रंगीरुह भोयः सोयं चंद्रस्तपति किरणैर्मामिति प्राप्तिमेतत्ता॥ पूर्वं चैव कारणस्वभावानुरूप्यं का
र्यस्य॥ अत्र त्वागंतुकतदीयदुष्टसंसर्गानुरूपमिति भेदः॥ विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमुद्यमः॥ युक्तो वा
रणलाभोयं स्यान्न ते वारणार्थिनः॥ इदं सममनिष्टस्याप्यवाप्तिश्चेति अप्यर्थसंस्तुत्या तस्य त्रिविषमस्यापि विष
यस्य प्रतिद्वंद्वि॥ इष्टावाप्तेरनिष्टस्याप्रसंगाच्च॥ अत्र गजार्थिनः राजानमनुसरतो द्वारि वैरोधमाराप्र

तिनर्मवचनमुदाहरणं॥ तच्चात्र निवारणमनिष्टमापन्नमित्यत्रोदाहरणत्वमाशंकनीयम्॥ एजवतर्कि
तोत्कटानिवारणं संभावितमिति तदंशे हृतपप्रवृत्तस्य विषमालंकारोदाहरणे स्विवतर्कितोत्कटानि
ष्टावासमावात्॥ किंच पत्रोत्कटानिष्टसत्वेपि श्लेषमहिम्ना इष्टार्थप्रतीतिस्तत्रापि समालंकारो ज्ञानि
हत एव॥ यथा॥ उच्चैर्गजैरटनमर्थयमान ए एव त्वामाश्रयन्निह चिराद् षितोस्मि राजन्॥ उच्चाटन
त्वमपि लंभयसे तदेव मा वमघनैव विपलामहतोहि सेवा॥ अत्र व्याजस्तुतौ यद्यपि स्तुत्यानि
दाभिव्यक्तिविवक्षायां विषमालंकारस्तथापि प्राथमिकस्तुतिरूपवाच्यकक्षायां समालंका
रोनवार्यते। एवं निष्ठायां वा त्विसत्वेपि श्येषवशादसतोऽनिष्टार्थस्य प्रतीतिस्तत्रापि अस्यालंका
रस्य नक्षतिः॥ यथा॥ शत्रून्खल्लकर्तव्यमिति पित्रा समीरितः॥ तदेश स्तं कृतवान्नित्यं राजानलं
चितं॥ अत्र पितुराज्ञानंलंधितं तत्र विरोधालंकाराभिव्यक्तार्थेन त्वलिखत्वत्र यद्द्वयविभा
गात्मकरूपानरस्यापि विवक्षायां सत्वेपि न स्वत्तु नातीति न त्वन्वित्येकपदत्वेनुवर्तते सदर्थां
तरपरत्वातरमाद्यायसमालंकारोप्यस्त्येव॥ श्लेषलंध्यासदिष्टानाप्रिप्रतीतिमात्रेणाविगतम्

कुवलयानंदः दाहरणं ॥ यथा ॥ सत्यं तपः सुगत्यै पततां संबुबुधे विप्रतीक्ष्य संसंतं ॥ अनुभवति सुगतिमुक्तां लतपदस्तलमात्र
३६ समस्तकमनीयं ॥ विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया ॥ नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नति
मं ॥ यथा वा ॥ मलिनयितुं खलवदनं विमलयति जगंति कीर्तिस्ते ॥ मित्राह्लादं कर्तुं मित्राय दुह्य
ति प्रतापोपि ॥ अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं ॥ ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः ॥
अत्र यत्र महाजलराशौ चत्वारि ब्रह्मांडानि बुद्बुदायमानानि दृश्याधारस्यातिविशालत्वे प्रदर्शिते अ
न मांतीत्याधेयानां गुणानामाधिक्यवर्णनं ॥ यथा वा ॥ युगांतकालप्रतिसंहृतात्मनो जगंति यस्यां
सविकाशमासत ॥ तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ॥ आधेयाधाराधि
क्यं तदपि तन्मतं ॥ कियद्वाग्ब्रह्म यत्रैते विश्राम्यंति गुणास्तव ॥ अत्रैते इति प्रत्यक्षदृष्टमहावैभवत्वेनो
क्तानां गुणानां विश्राम्यंतीत्यसंबाधावस्थानोक्त्याधारस्य वाग्ब्रह्मण आधिक्यं वर्णितं ॥ यथा वा ॥ अहो
विशालं भूपाल भुवनत्रितयोदरं ॥ माति मातुमशक्योपि यशोराशिर्यदत्र ते ॥ पद्यप्यत्रोदाहरणद्वयेपि कि
यद्वाग्ब्रह्म अहो विशालमिति चाधारयोः प्रशंसा क्षिप्यते ॥ तथापि तत्तत्वेन सिद्धवत्कृतयोः शब्दब्रह्मभुव रामं ३६

नोदरयोः गुणयशोराश्याधिकरणत्वेनाधिक्यं कल्पयित्वैव प्रशंसा क्षिप्यते इति ॥ तच्च प्रशंसा प्रस्तुतगुणय
शःप्रशंसायामेव पर्यवस्यति ॥ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ॥ मणिमालोर्मिका तेद्य करे ज
पवटायते ॥ अत्र मणिमालामयोर्मिकायास्तावदंगुलिमात्रपरिमितत्वात्सूक्ष्मायाः अपि विरहिण्यां करे कंके
कणवद्वेष्टितायां तस्मिन् जपमालावलंबनं इत्याकस्य विरहकार्श्यादिति सूक्ष्मता दर्शिता ॥ यथा वा ॥
यन्मध्यदेशादपि ते सूक्ष्मं लोलाक्षि दृश्यते ॥ मृणालसूत्रमपि ते नैव माति स्तनांतरे ॥ अन्योन्यं नाम य
त्र स्यादुपकारः परस्परं ॥ त्रियामा शशिना भाति शशी भाति त्रियामया ॥ यथा वा ॥ यथोर्ध्वाक्षः पिबत्यंबु प
थिको विरलांगुलिः ॥ तथा प्रपापालिकापि धारां वितनुते तनुं ॥ अत्र प्रपापालिकायाः पथिकेन स्वा
सक्तायाः पानीयदानव्याजेन बहुकालं स्वमुखावलोकनमभिलषंत्या विरलांगुलिकरणात् चिरं पानीय
पानानुवृत्तिसंपादनेनोपकारं कृतः ॥ तथा प्रपापालिकयापि स्वमुखावलोकनमभिलषतः पथिकस्य धा
रातनूकरणात् चिरं पानीयदानानुवृत्तिसंपादनेनोपकारः कृतः ॥ क्वचिदुभयोर्व्यापारेणान्यं स्वस्वोपकारे व
परस्परोपकारो निबध्यते ॥ विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं ॥ गतेपि सूर्ये दीपस्थास्तमश्छिंदं

कुवलयानंद
३७

तितनात्कपथावारा॥ कमलमम सिकमले कुवलमेतानि कन्नलतिव्यापा॥ साचसनुमारस्वभगेन्चुत्पात्तपरं
रासेयं॥ अत्राघेसपस्पप्रसिद्धाधारस्याभावेपित्तत्कारारामन्यत्रस्थितिरुक्ताद्दितीयेसलिलस्पप्रसिद्ध
धारस्याभावेपिकमलेकुवलयपोरन्यत्रावास्थितिरुक्ता॥ तृ०चितुप्रसिद्धाधाररहितानामाधारांतररनि
र्दिश्शंविनैवाप्रलमवस्थितिर्विरोना॥ यथा॥ दिवमप्युपयातानामाकाल्पमनल्पगुणगणायेषां॥ रमयंति
जगंतिगिरःकथमिवकवयोनतेवंद्याः॥ अकवीनामभावेपितिद्गिरामाधारनिर्दिश्शंविनैवाकल्पमव
स्थितिरुक्ता॥ विशेषः सोपियदेकंचत्स्वनेकत्रवर्ण्यते॥ अंतर्बहिःपुरःपश्चात्सर्वदिक्ष्वपिसैवमे॥ यथा
वा॥ हृदयान्ताप्रथातोसिदिक्षुसर्वासुदृश्यसे॥ वत्सरामगतोसीतिसंतापेनानुमीयसे॥ किंचिदारंभ
तोशक्यवस्त्वंतरकृतिश्चसः॥ त्वांपश्यतामयालब्धंकल्पवृक्षनिरीक्षणादितीयोएजसप्ताध्यारंभेरामनोम
भवादिहृष्ठिसमाशक्यवस्त्वंतरकृ॰यथावा॥ स्फुरद्भुतरूपमुत्प्रतापज्वलनंत्वांसृजतानवद्यविद्यं॥
विधिनाससृजेनरोमनो॥ मर्भुविसत्पसविताद्धहस्पतिश्च॥ अत्राधेराजदर्शनारंभेणाक्तिल्पदृष्टा
शक्यवस्त्वंतरकृति॥ वृक्षदर्शनस्याचाचातोयथाकारितथाकारिक्त्रिपेतचेत॥ यैर्जगत्प्रीयते हांति राम०
३७

कु[illegible]तिवेकुसुमायुधा॥ यदतसाधनत्वेनतत्पोहतोवगतंतत्तोनचिदिद्दिद्धसाधनंत्रियेतचेत्सव्याघातपदापत्तावनत
पावेनविहुयान्तंतद्वनेनतत्वाविदंदिनाविदिद्धसाधनंत्रिपेतेचेत्सोपिव्याघातःतः॥ तत्राद्यउदाहृतुः॥ दि
तीयोयथा॥ दृशादग्धंमनसिजंजीवयंतिदृशैवयाः॥ विरूपाक्षस्यजयिनीस्तास्तुवेवामलोचनाः॥ सो
यंसानिबद्धाविक्रियाकार्यविरोधिनी॥ दयाचेद्बालदृतिमय्यपरित्पाइएवते॥ कार्यविशेषनिष्पाद
कत्तयावेनचित्तंभाव्यमानाद्र्थाद्न्येनकार्यविरोधिनाक्रियासौकर्य्यसमर्थीचेत्सोपिव्याघातः॥ का
र्यविरुद्धक्रियायांसोकर्येकारणास्पसतेरांतहानुगुणये॥ यथाजैत्रयात्रौन्मुखेनराज्ञायुवराजस्पराज्यएव
स्थापनेयत्कारणत्वेनसंभावितंबालत्वंप्रस्तुततद्विरुद्धस्यसहनयनस्यैवकारणतयायुवराजेनपरित्याग
स्यापुनरुक्तंदर्शयतासमर्थ्यते॥ यथावा॥ कुर्वीनविसृजत्यर्थंनरोदारिद्र्यशंकया॥ दाताविसृजत्यर्थंत
येवनत्तुशंकया॥ अत्रपर्वीनरादेयपक्षप्रतिपक्षनिरूपणायोर्वेचनेइतिलक्षणाम्हगतिः॥ गुम्फःकारणमा
लास्याद्यथाप्राक्प्रांतकारणैः॥ नयेनश्रीःश्रियात्यागस्त्यागेनविपुलंयशः॥ उत्तरोत्तरकारणभूतपर्वपूर्वैः
पर्वकारणभूतोत्तरोत्तरोत्तरैर्वावस्तुभिःकृतोगुंफःकारणमाला॥ आद्योदाहृता॥ द्वितीयायथा॥ भवति

नरकाः पातपापं हरिग्रसंभवं ॥ हारिग्रामप्रदानेन तस्माद्दानपरो भवेत् ॥ गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्म
ता ॥ नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तंभदोलिनौ ॥ दोःस्तंभौ जानुपर्यन्तप्रलंबनमनोहरौ ॥ जानुनी रत्नमुकुरा
कारे तस्य हि भूभुजः ॥ उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः ॥ पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो वा ॥ गृहीतमु
क्तरीतिः ॥ तत्राद्यप्रकार उदाहृतः ॥ द्वितीयो यथा ॥ दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्राम
ष्य सुधीभवंति किरणा राशेः स यासामभूत् ॥ यस्तापित्रिमुखस्य योस्य हविषे यस्तस्य जीवातवे वोढा यद्गुणमेव
मन्मथरिपोस्ताः पातु वो मूर्तयः ॥ दीपकैकावलीयोगान्मालादीपकमिष्यते ॥ स्मरेण हृदये तस्यास्तेन त्वयि
कृता स्थितिः ॥ अत्र स्थितिरिति पदमेकं स्मरेण तस्या हृदये स्थितिः कृता तेन तस्या हृदयेन त्वयि स्थितिः कृते
त्येवं वाक्यद्वयान्वयि अत्र दीपकं गृहीतमुक्तरीतिसद्भावात् ॥ एकावली चेति दीपकैकावलीयोगः ॥ यथा वा ॥
संग्रामांगणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितं ॥ कोदंडे
न शराः शरैरशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं ॥ अत्र येन येन सह
सा यद्यत्समासादितमिति संक्षेपवाक्यस्थितमेकं समासादितपदं कोदंडेन शराः इत्यादिषु दशस्वपि विवरण

वाक्येषु तत्तदुचितलिंगवचनविपरिणामेनान्वेतीति दीपकं ॥ शरादीनामुत्तरोत्तरस्य विशेषणभावादेकावली चेति दी
पकैकावलीयोगः ॥ उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ॥ मधु मधुरं तस्माच्च सुधा तस्याः कवेर्वचः ॥ यथा वा ॥ अंतर्हि
हृतो त्रिलोकी निवसति फणिनामीश्वरः सोपि शेषो यो सोप्येकदेशेनमपि चुलुकयांबभूवेति स्वकार ॥ यन्नोद
र ॥ नेखद्योतल्लीलामयमपि नभसि श्रीनृसिंहक्षितीन्द्र त्वत्कीर्तेः कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति
॥ अपंक्त्याद्यगुणोत्कर्षः ॥ अश्लाघ्यगुणोत्कर्षो यथा ॥ तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ॥ वायु
ना किं न नीतोसौ मामयं प्रार्थयेदिति ॥ उभयरूपो यथा ॥ गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभो महत् ॥ नभसो
पि महद्ब्रह्म ततोप्याशा महीपते ॥ तत्र ब्रह्मपर्यन्ते महत्वं श्लाघ्यगुणः ॥ प्रकृतार्थाशायामश्लाघ्यगुणः ॥ पर्या
संख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंजय ॥ यथा वा ॥ शरणं किं प्रप
न्नानि विषवन्मारयंति वा ॥ न त्यज्यंते न भुज्यंते कृपणेन धनानि यत् ॥ अयं क्रमालंकार इति केचिद्व्याज
हुः ॥ पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ॥ पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्रभा ॥ अत्रैकस्याः का
मिनीवदनप्रभायाः क्रमेणापद्मचंद्ररूपानेकाधारसंश्रयणं पर्यायः ॥ यद्यपि पद्मसंश्रयणं वेदितो नो

कुवलयानंद
३९

नंतयापि मुक्त्वेति परित्यागोक्त्या प्राक्संकायराणां स्पष्ट एव पर्यायनिर्वाहः॥ श्रोणीबंधस्त्यजति तनुतां सेव
ते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां॥ धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं त्वद्गात्राणां
गुणविनिमयः कल्पितो यौवनेनेत्यत्र पर्यायं काव्यप्रकाशकार उदाजहार॥ सर्वंत्तशाद्पर्यायो यथा॥ नन्वात्र
पस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा॥ प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कंठेधुना व
सति वाचि पुनः खलानां॥ सर्वोपि शुद्धपर्यायः॥ संकोचपर्यायो यथा॥ प्रांतस्वारित्वा वसुधामशेषां छायासु
विश्रम्य ततस्तरूणां॥ प्रौढिंगते संप्रति तिग्मभानौ शैत्यं शनैरंतरयामपासीत्॥ अत्र शैत्यस्योत्तरमाधारसं
कोचात्संकोचपर्यायः॥ विकासपर्यायो यथा॥ बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत॥ अधुना मृगशावाक्षि
हृदयेप्येष दृश्यते॥ अत्र रागस्य पूर्वाधारपरित्यागेनाधारांतरसंक्रमणमिति विकासपर्यायः॥ एकस्मिन्
घनेकं वा पर्यायः सोपि संमतः॥ अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि॥ यथा वा॥ पुराभूदस्माकं प्रथममवि
भिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः॥ इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
हतानां प्राणानां कुलिशकठिनानां फलमिदं॥ अत्र दंपत्योः प्रथममभेदः॥ ततः प्रेयतमभावः॥ ततो भार्यापति रामः ०

३९

भावः॥ इत्येकस्य पर्यायः॥ परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः॥ जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियं॥ यथा
वा॥ तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेधुना॥ येन जर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोज्ज्व
लं यशः॥ परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं॥ स्नेहक्षयः प्रदीपेषु स्वांतेषु न नतभ्रुवां॥ यथा वा॥ विलंघ
यंति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि॥ बिभर्ति यस्यामपि वक्रिमाणमेको महाकालजटार्धचंद्रः॥
अत्र चोदाहरणे निषेधः शाब्दः द्वितीये त्वार्थः॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता॥ सद्यः शिरांसि
चापान्वा नमयंतु महीभुजः॥ अत्र संधिविग्रहप्रमाणं प्राप्तयोः शिरश्चापनमनयोर्युगपदुपस्थितयोर्प
पत्कर्तुमशक्यतयोर्विकल्पः॥ यथा वा॥ पततु विरतं वारि नृत्यंतु च कलापिनः॥ अद्य कांतः कृतांतो वा दुःख
स्यांतं करिष्यति॥ प्रियस्यागमनं चेन्न मरणं भाशंकनीयं॥ मरणे तु प्रियसमागमसंभव इति तयोराशंसायां
विकल्पः॥ बहूनां युगपद्भावभाजां गुंफः समुच्चयः॥ नश्यति पश्यति पश्यति त्रस्यति च भवद्रिपुः॥ अविरोधेन सं
भावियोगपद्यानां समुच्चयः॥ यथा वा॥ बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं यद्विदधाति सा
विधुरिता साधीतदाक्षण्यतो॥ शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेंखति भ्राम्यत्युल्लुठति प्रणश्यति ग

कु॰ कुवलयानंदः
४०

लत्युन्मूर्च्छति द्रुह्यति॥ अत्र कासांचित्क्रियाणां किंचित्कालभेदसंभवेपि शतपत्रपत्रशतभेदन्यायेन यौगप
द्यविरहातिशयद्योतनाय विवक्षितमिति लक्षणानुगतिः॥ अहंप्राथमिकाभाजामेककार्यान्वयेपि सः॥ कुलं
रूपंवयोविद्याधनंचमदयत्यमुं॥ यत्रैकः कार्यसिद्धिहेतुत्वेन प्रक्रांतस्तत्रान्येपि यद्यहमहमिकया ख
लेकपोतिकान्यायेन तत्सिद्धिं कुर्वंति सोपि समुच्चयः॥ यथा मदे अभिजात्यमेकं समर्थं तद्वद्रूपतिव
यआदिकमपि तत्साधनत्वेनावतरति॥ यथा वा॥ प्रसन्नं प्रच्छिन्नं गृहमुपगते संभ्रमविधिर्निरुत्से
कोल्लेखः आसनमभिवगंधापरकथा॥ प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः श्रुतेत्यंतासक्तिः पुरुष
मभिजातं प्रथयति॥ अत्र मिथैकगतानां तुल्यपक्षाकारकदीपकं॥ गच्छत्यागच्छति पुनः पांथः पश्यति पश्यति
॥ यथा वा॥ निद्राति स्नाति तिष्ठत्युत्चलति चकभरान्शोषयत्यंतरास्ते दीव्यत्यक्षैर्नचापंगदितमवसरो भू
यश्चायाहि याहि॥ इत्युद्दंडैः प्रभूणामसकृदधिकृतैर्वारिता द्वारि दीना नस्पश्यास्मान्विवेकन्यसरसेहहा
हचामंतरंगैरपांगैः॥ आद्योदाहरणेऽस्तु तस्य पांथस्य कर्तृकारकस्य गमनादिषत्त्वयः॥ द्वितीये त्वध्याहृ
तस्य प्रभोः कर्तृकारकस्य निद्रादिषट्स्वेकस्यानेकचाक्रमान्वयेन दीपकच्छायापत्त्या कारकदीप रामः
४०

कं॥ प्रथमसमुच्चयप्रतिद्वंद्वी॥ समाधिः कार्यसौकर्यं कारणांतरसन्निधेः॥ उत्कंठितास्मि तरुणी जगामास्तं
च भानुमान्॥ यथा वा॥ मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः॥ उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं॥ के
नचित्प्रारब्धस्य कार्यस्य कारणांतरसन्निधानाद्यत्सौकर्यं तत्समाधानात्समाधिः॥ द्वितीयसमुच्चयप्रति
द्वंद्वी समाधिः॥ तत्र बहूनां प्रत्येकसमर्थानां खलेकपोतिकान्यायेन युगपत्साधनार्थमवतारः॥ अत्र
हेतुत्वेनैकेन कार्यसमारंभस्थितेः अन्यस्य काकतालीयन्यायेनापतितस्य तत्सौकर्याधायकत्वमात्रमित्युदा
हरणे उत्कंठिते त्युत्कंठितैव प्रियाभिसरणे पुष्कलं कारणं न त्वंधकारमपेक्षते॥ अत्र त्वागेहिनारीणाम
त्राकालरत्नो मनोभव रति न्यायार्द्दैवाद्दापन्नतं ध कारेण तत्सौकर्यमाचेदूतमिति॥ एवं द्वितीयेपियो
ज्यं॥ प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः॥ जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ॥ यथा वा॥ म
मरूपकीर्त्तिमहरद्भुवि यस्तदनुप्रविश्य हृदयेपमिति॥ त्वयि मत्सरादिव निरस्तदयः सततं रोक्षिणोति खलु ता
मदनः॥ एवं बलवति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनेप्रत्यनीकमिति स्थिते सोक्षात्प्रतिपक्षे प
राक्रमः प्रत्यनीकमिति कोऽसौ तिवं न्यायेनेपालितं॥ यथा॥ मधुव्रतौघः कुपितः स्वकीयमधुप्रपानोन्मीलनेन॥ वि

कुवलयानंद ४१

वंसमाक्रम्य वलात्सुधांशोः कलंकमंरे सुवमातनोति ॥ वैमत्येनार्थस्य सिद्धिः काव्यार्थापत्तिरिष्यते ॥ सजि
तानीति विवक्षितं ॥ तथा च सोपायेन जितस्तेन पद्मानि जितानीति किमु वक्तव्यमिति दंडापूपिकान्यायेन प
द्मजयरूपस्यार्थस्य सिद्धिः काव्यार्थापत्तिः ॥ तांत्रिकार्थापत्तिव्यावर्त्तनाय काव्यविशेषणं ॥ यथा वा ॥ अधरो
यमधीराक्ष्या बंधुजीवप्रभाहरः ॥ अन्यजीवप्रभां हंत हरतीति किमद्भुतं ॥ बंधुकीयं हरूपमित्यानिर्गतोपो
पपीयं गो ॥ हरूपस्यान्यदीयस्य भेदने कारूयातपी ॥ समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं ॥ जितोसि मं
द कंदर्प मच्चित्तेस्ति त्रिलोचनः ॥ अत्र कंदर्पजयोपन्यासस्य दुष्करविषयत्वात्समर्थनसापेक्षस्य मच्चित्ते
स्ति त्रिलोचन इति स्वांतःकरणेषु शिवसन्निधानप्रदर्शनेन समर्थनं काव्यलिंगं पदार्थहेतुकं यथा ॥ भ
स्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शिवं हा सोपानपरंपरां गिरिसुताकांतालयालंकृतिं ॥ अद्याराध
नतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥ अत्र मोक्ष
स्य महामोहत्वप्रसिद्धमिति तत्सामर्थ्येन सुखालोकोच्छेदिनीति पदार्थो हेतुः ॥ क्वचित्पदार्थवाक्यार्थयोः परस्प
रापेक्षौ हेतुभावं भजतः ॥ यथा चित्तं कुरुष्व करजपतितौ विदुषी स्तसाविभनिर्यान ॥ यम्मनाम्नपुरस्थतेन राम० ४१

तनुलनामिच्छति चामरेणकः ॥ अत्र चारस्पदमयंतीकंजाल साम्याभावे विदुषीमर्द्दनियान विमर्ज्जितेति वाक्यार्थः ॥
यम्मनाम्नपुरस्थतेनेति पदार्थश्च तु मयंमिलितौ हेतुः ॥ क्वचित्समर्थनीयार्थसमर्थनार्थवाक्यार्थेपदार्थो हेतुः ॥
यथा ॥ वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारेन क्वापि क्वचिदमपि भवंतं प्रणतवान् ॥ नमन्मुक्तः संप्रत्य
हमतनुरग्रेप्यनतिभागितीश क्षंतव्यं तदिदमपराधद्वयमपि ॥ अत्र तावद्यराधद्वयमपि समर्थनीयम
स्यार्थत्वात्तत्समर्थनं च पूर्वापरजन्मनोरनमनांभ्यां वाक्यार्थभूताभ्यां क्रियते ॥ अत्र द्वितीयवाक्यार्थेऽत
नुत्वमेकपदार्थो हेतुः ॥ अत्रापि संप्रतिनमन्मुक्त इति वाक्यार्थोऽनेकपदार्थो वा हेतुः ॥ क्वचित्परस्पर
विरुद्धयोः समर्थनीययोरुभयोः क्रमाद्द्वौ हेतुभावं भजतः ॥ यथा ॥ असोढा तत्कालोल्लसदसहभावस्य तप
सः कथानां विश्रंभेष्वथ च रसिकः शैलदुहितुः ॥ प्रमोदं वो दिश्यात्कपटवटुवेषापनयने त्वराशैथिल्याभ्यां यु
गपदभियुक्तः स्मरहरः ॥ अत्र शिवस्य युगपत्कृत्रिमवटुत्वचर्यापनयने त्वरातदनुवर्त्तने द्वयोर्विरुद्धयोः
क्रमाद्द्विरिज्ञातीव्रतपसोऽसहिष्णुत्वं तत्संलापकौतुकं त्वचत्सभाव वर्थौ हेतुत्वेन निबद्धौ ॥ क्वचित्परस्पर
विरुद्धयोरुभयोः समर्थनीयोरेक एव हेतुः ॥ यथा ॥ जीयादंबुधितनया धररसमास्वादयन्मुरारिरयं ॥ अत्र

व ...यानंद विमथनकुशं कलयन्निपुफलं च सफलं च॥ अत्र विफलत्वसफलत्वकलनयोर्विरुद्धयोरेकत्र एवांचुचितत्वनपायस्तत्सा
५२ धोहेतुः॥ इदं च काव्यलिंगं हेत्वलंकार इति केचिद्यवजगुः॥ हेतोर्हावरिये वितावचकतरोद्देशे कलिंगकविवोगदे
वी बहुदेशदर्शनसंबोध्यहृत्वाविरलिंगिगतः॥ एनोमत्तेविमथ्यसद्वमगुराजित्ताभीसरोजासंनंब्राह्मा ताग
मयक्षितौकययसावेकाकिनी स्यादस्यति॥ रत्पत्र बुद्धरागः प्राप ताक्षयंगोदावेर्योकर्त्तव्यमित्य संभावनीयार्थो
पपादकस्यातोवमथ्येत्यादितद्विशेषतास्तत्त्पस्तेनश्लेषारव्यो गुणा इति॥ श्लेषापि चेद्वटमानार्थव्वटकार्थस्य व
र्तानमितिश्लेषलक्षणमिति च जयदेवेनोक्तं॥ वस्तुतस्तत्रापि पदार्थहेतुकं काव्यलिंगमेतत्तमेदकाभा
वात्॥ नन्त्साभिप्रायपदार्थं वाक्यार्थविन्यसनरूपपरिकरालंकाव्यालिंगस्यापि कंभेदकं॥ उच्यते॥ परिकरे पदा
र्थे वाक्यार्थबलात्प्रतीयमानोर्थो वाच्योपकारकतां भजते॥ काव्यलिंगे तु पदार्थवाक्यार्थयोर्वेव हेतुभावं भज
तः॥ ननु यद्यपि सुरवात्सोको छेदिनीत्यादिपदार्थहेतुककाव्यलिंगोदाहरणे प्यन्यनतिमानित्यादिवाक्या
र्थहेतुककाव्यलिंगोदाहरणे च पदार्थवाक्यार्थो हेतोर्वे वहेतुभावं भजतः॥ तथापि पद्मनाथपुरस्कृते नेतिप
दार्थहेतुकोदाहरणे मधिकेनेति विलोचन इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थस्य हेतुबोध रा॰ ५२

तुप्रवेशो लभ्यते॥ पद्मनेति हि अविवेकितामिप्रायगर्भं॥ विदुषीत्यस्य प्रतिनिर्देश्यावात्रिलोचन इति च हेतुर्य
दाहृतं तीपलोचनत्वाभिप्रायगर्भकंदर्पजयोपयोपयोगित्वात्तस्य॥ सत्यं॥ तथापि नतयोः परिकर एव
किंतु तदुत्थापितं काव्यलिंगमपि॥ प्रतीयमानाविवेकविशिष्टतपद्मनाभपुरस्कर्तृत्वस्यानेकपदार्थस्य प्र
तीयमानकंदर्पदाहकतृतीयलोचनविशिष्टस्य शिवस्य च वाक्यार्थस्यैव हेतुभावात्॥ न हि त
योर्वाच्ययोर्हेतुभावे तात्पर्यं प्रतीयमानं मध्ये किंचिद्द्वारमस्ति॥ यथा सर्वोभ्युच्चिनियानस्येत्यादिपदार्थपरि
करोदाहरणे सर्वाभ्युच्चिनिधानत्वादिपानानेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीय॥ तत्र तथा च वाक्या
र्थपरिकरोदाहरणे पर्यन्तविधपातनादवाक्यार्थप्रतीयमानेनाहं व्यासकृत्यादित स्मात्पद्मने त्यत्र त्रिलोचन
इत्यत्र प्रतीयमानवाच्यस्यैव पदार्थस्य हेतुभावोपपादकतया काव्यलिंगस्यांगमेव॥ यथापि वन्ते समानकांति
सलिले मानं तद्दिष्टवमितिनेकवाक्यार्थहेतुककाव्यलिंगोदाहरणे वन्ते च समानकांतीत्यादिकानि दूरीवर
राधिके सविशेषणानि तेषां वाक्यार्थानां हेतुभावोपपादकानि॥ तत्र वाक्यार्थहेतुककाव्यलिंगे पदार्थहेतुक
काव्यलिंगमंगमिति न तयोः काव्यलिंगोदाहरणत्वे काचिदनुपपत्तिः॥ उक्तिर्थान्तरन्यासः स्यात्सामान्यविशेषयोः॥

रूपस्य

हनूमानब्धिमतरद्दुष्करं किं महात्मनां॥ गुणवत्तसंसर्गाद्याति स्वल्पोपि गौरवं॥ पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते॥
सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थांतरन्यासः॥ तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवति॥ तत्र च विशेषे प्रस्तुतेन सह
प्रस्तुतसामान्यस्य सामान्येनोक्तेन सहाप्रस्तुतविशेषरूपस्य चार्थस्य न्यसनमर्थांतरन्यास इत्युक्तं भवति॥ तत्राद्य
स्यादिमीयाद्यमुदाहरणं॥ द्वितीयस्य द्वितीयश्लोकः॥ नन्वयं काव्यलिंगान्नातिरिच्यते यथाहि तत्रोदाहरणद्वयेप्यप्र
स्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसामान्ययोः कथमुपकरोतीति विवेक्तव्यं॥ नहि सर्वथैवाप्रस्तुता
न्वयानं च हनूमदादिप्रस्तुताभिधानं युज्यते॥ न तावदप्रस्तुतप्रशंसायामिव प्रस्तुतव्यंजकतयाप्रस्तुतयोरपि सामान्य
विशेषयोः स्वशब्दोपात्तत्वात्॥ नाप्यनुमालंकारइव प्रस्तुतप्रतीतिजनकतया तद्धि हि व्याप्तिपक्षधर्मत्वाद्याता
धमावात्॥ नापि दृष्टांतालंकार इवोपमानतया विंबत्वेवात् दोषः स्वचक्षाधर्मेऽचलस्य वीरकोपकरः॥ ववनत
हूमंगवद्धनिषिद्धहरिनिद्रातस्करः करिराडित्यादिषु सामान्ये विशेषस्योपमानत्वदर्शनेपि विशेषे सामान्य
स्य क्वचिदपि तद्दर्शनादुपमानतयाऽन्वये सामंजस्यस्याप्रतीतेश्च॥ तस्मात्प्रस्तुतसमर्थनतयैवाप्रस्तुतस्योपयो
गइहापि वक्तव्यः॥ तथा च वाक्यार्थहेतुकं काव्यलिंगमेव स्यान्नत्वलंकारांतरस्यावकाश इति चेत्॥ अत्रेके

चित्॥ समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिंगं निरपेक्षस्यापि प्रतीतिवैशद्याय समर्थनेऽर्थांतरन्यासः॥ नहि
पतन्ति च समानकांतिसलिल इत्यादि काव्यलिंगोदाहरणे शिवा॥ अत्रयोचगत्वेशरद्दाशशांकेधावत्यपे
क्षांतत्तदुत्त्वटाक्षा॥ कासां न सौभाग्यगुणांगनानां नघुः परिभ्रष्टपयोधराणां॥ दिवाकराद्रक्षति यो गुहासु लीनं
नं दिवाभीतमिवांधकारं॥ क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीवेत्याद्यर्थांतरन्यासोदाहरणे
षु प्रस्तुतस्य समर्थनार्थित्वमस्तीति॥ वास्तवं तत्त्व प्रायो वाच्येयं॥ अर्थांतरन्यासेपि हि विशेषस्य सामान्येन
समर्थनानपेक्षत्वेपि सामान्यं विशेषेण समर्थनमपेक्षत एव निर्विशेषं न सामान्यमिति न्यायेन बह
नामप्यसाराणां संयोगः कार्यसाधकइत्यादि सामान्यस्य तृणैरारभ्यते रज्जुस्तेन नागोपि बध्यत इ
त्यादि संप्रतिपन्नविशेषावतरणं विना नाबुद्धौ प्रतिष्ठितत्वासंभवात्॥ नन्वत्र सामान्यस्य कासां न सौ
भाग्यगुणांगनानामित्यादि विशेषसमर्थनोर्थसामा न्यस्यैव लौकिकसंप्रतिपन्नतया विशेषान्वतरणं वि
नैव बुद्धौ प्रतिष्ठितत्वं संभवतीति श्लोके न्यसनं नापेक्षितमिति वाच्यं॥ सामान्यस्य लोके संप्रतिपन्नत
त्विपमाभावात्॥ नहि योयो धूमवान्सोग्निमानिति व्याप्तिरूपसामान्यस्य लोके संप्रतिपन्नतयाप्यथा महानसइ

कु॰ कुवलयानंदः

५५

त्तित्तद्विशेषरूपार्थदृष्टांतोनुपादानसंभवमात्रेणप्रसिद्धव्याप्तिरूपसामान्योपन्यासेपितद्विशेषरूपसामान्योपन्या
संनिरपेक्षत्वंसंभवति॥नचैवंसामान्येनविशेषसमर्थनस्यप्यलोके चिन्नस्यसामान्यस्यलोकप्रसिद्धत्वाभा
वेतस्यबुद्ध्यारोहायपुनर्विशेषांतरन्यसनप्रसंगइतिवाच्यंइष्टापत्तेः॥अत्रैवविषयेविकस्वरालंकार
स्यान्नुपदमेवदर्शयिष्यमाणत्वात्॥किंचकाव्यलिंगेपिनासर्वत्रसमर्थनसापेक्षत्वनियमः॥चिक ग
प्रकरणज्ञपेतितेइत्यत्रतदभावात्॥उपमानवस्तुषुवर्णनीयसाम्याभावेननिंदायाःक्वचित्कुलस्तुस्त
त्वेनात्रसमर्थनापेक्षाविरहात्॥नहितत्रास्पदास्येपिगतोधिकारितांनशारदःपार्वणशर्वरीश्वरइत्यादिषु
समर्थनंदृश्यते॥नचिशेशानशास्त्रेणनाग्निनानचमस्तुना॥अप्रतीकारपारुष्याःस्त्रीभिरेवत्रिपत्कृताइ
त्यादिकाव्यलिंगविषयेसमर्थनापेक्षाविरहेप्यप्रतीकारपारुष्याइत्यादिनासमर्थनदर्शनात्॥नहित
त्रस्त्रीणांविषाग्निनिर्मितत्वाभावप्रतिपादनंसमर्थनसापेक्षंप्रसिद्धत्वात्तस्मादुभयतोव्यभिचारात्समर्थ
नापेक्षसमर्थनेकाव्यलिंगंतन्निरपेक्षसमर्थनेऽर्थांतरन्यासइतिविभागः॥किंतुसमर्थ्यसमर्थकयोःसा
मान्यविशेषसंबंधेऽर्थांतरन्यासस्तदितरसंबंधेकाव्यलिंगमित्येवव्यवस्थाववारणीया॥प्रपंचस्त्वचि रामः

५५

त्रमीमांसायांद्रष्टव्यः॥एवमप्रकृतेनप्रकृतसमर्थनमुदाहृतं॥प्रकृतेनाप्रकृतसमर्थनंयथा॥युद्धच्युतेपा
र्वतियापदं॥नयेनरूपमितपव्यभिचारितद्वचः॥तथाहितेशीलमुदारदर्शनेतपस्विनामप्युपदेशतांगतं॥य
थावा॥हानंरदस्त्वपितुलैःसहसाविरूढोकोविद्यमानगतिराश्रितमुत्सहेत॥यदंतिनःकटकटाहतटान्
मिमंक्षोर्मंक्षूदयातिपरितःपटलैरलीनां॥यस्मिन्विशेषसामान्यविशेषाःसविकस्वरः॥सत्वाजिष्येमहांतो
हिदुर्धर्षासागराइव॥॥यच्चकस्यचिद्विशेषस्यसमर्थनार्थंसामान्यंविन्यस्तंतत्प्रसिद्धाचपरितुष्य
ताकविनातत्समर्थनापयुनर्विशेषांतरमुपमानीकृत्यार्थांतरंन्यस्यतेतत्रविकस्वरालंकारः॥उत्तरार्द्धेय
थाकथंचिदुदाहरणं॥द्वंद्वउव्यक्तमुदाहरणं॥अनंतरत्नप्रभवस्ययस्यहिमंनसौभाग्यविलोपिजा
तं॥एकोहिदोषोगुणसंनिपातेनिमज्जतीदोःकिरणेष्विवांकः॥इदमुपमारीत्याविशेषांतरन्यसनेउ
दाहरणं॥अर्थांतरन्यसनविशायेयथा॥कर्णारुंतुदमंतरेणरणितंगाहस्वकाकस्वकंमाकंदस्यवरंद
शाल्मलिमिहत्वामन्महेकोकिलं॥यन्यानिस्यालवैभवेनकतिचिदहस्तानिकस्तरिकानेपालक्षितिपालभा
लपतिनेपकेनशंकेतकः॥यथावा॥मालिन्यमम्बरशशिनोमेयुलिटकलंकौयन्नोमरवेतत्तवेदरकृतिल

वांत्वमामां॥ दोषाविताऽबध्नमेनक्षत्रगुणात्वं चन्द्रगुणौ हि वञ्चसि मन्मथविडालंमौ॥ प्रायोक्तिरत्र वर्णितौ हेतौ तद्धेतु
त्वेनाकल्पने॥ कच्चाः कलिंदजातीरतमालस्तोममेचकाः॥ कापोतिशयाहेतौ तद्धेतुत्वपरिकल्पनं प्रौढोक्तिः
॥ पथाकच्चगततनैल्यातिशयाहेतौ यमुनातटरोहणं तद्धेतुपरिकल्पनं॥ पथावा॥ कल्पतरुकामदोग्ध्री
चिंतामणिधनदशंखानां॥ रचितो रत्नोभरणस्तेजः श्वासांतरां वरेरेषः॥ अत्र कल्पवृक्षादेवेकवि
तरणातिशयिवदान्यपराक्रवितरणाहेतौ कल्पवृक्षपरागादिरूपपंच निर्मितत्वेन तद्धेतुत्वपरिकल्पनं प्रौढो
क्तिः॥ संभावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये॥ यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव॥ यथावा॥ व
स्तरिकामृगाणामंडाद्गंधगुणमविलमासाद्य॥ यदि रहंविधिस्याखलजिह्वायां निवेशयिष्यामि॥ य
द्यर्थोक्तौ कल्पनमतिशयोक्तिर्मतेदृति काव्यप्रकाशकारः॥ किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतर
कल्पनं॥ मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन्॥ अत्र वेश्यावशीकरणस्यासंतं संभावितत्व
सिद्धये गगनकुसुममालिकाधारणरूपार्थांतरकल्पने मिथ्याध्यवसितिः॥ यथावा॥ अस्पृशेत् प राम०
तेयराद्वपरयालक्ष्मीलकताः स रव्ययाप्रत्राचक्षुरवेक्ष्यमाणा तिमिरप्रख्याः किला कीर्तयः॥ पिंते स्वरम ४५

एमंकलपताज्ञातेन वंद्रान्मकानां डाकरेण कूर्मरमणीदुग्धोदधेरेषसि॥ वचाघोत्तहरणां निदर्शनाग
मं॥ द्वितापंठमुद्धा॥ अत्र सर्वे येसंबंधरूपातिशयोक्तितो मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थ
तरकल्पनात्मतावच्छिन्नस्यापि विशेषणाभेदः॥ प्रस्तुतेवर्ण्यवाक्यार्थप्रतिबिंबस्य वर्णनं॥ ललितं निर्गते
नीरेसेतुमेषा चिकीर्षति॥ प्रस्तुतधर्मिणि यो वर्णनीयो वाक्यार्थःस्तमवर्णयित्वा तत्रैव सदृशस्य कस्यचित्प्र
स्तुतवाक्यार्थस्य वर्णनं ललितं यथा॥ कथंचिद्दासिरायसमागतं तत्कांतोपेक्षितप्रतिनिवृत्तनायिकांतरंगस
नानापकानपनार्थे दूतीप्रेषणपितृकामां नायिकां सखीसयाद चेनेनतद्यापारप्रतिबिंबभूतगततजलसेतुबं
धवर्णनं॥ नेयमप्रस्तुतप्रशंसा॥ प्रस्तुतधर्मिकत्वात्॥ नापि समासोक्तिः॥ प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसा
म्यारणेन साऽस्पेशावाऽप्रस्तुतवृत्तांतस्फूर्त्यभावात्॥ अप्रस्तुतवृत्तांतादेचसरूपादिहप्रस्तुतवृत्तांतस्य गम्य
त्वात्॥ नापि निदर्शना॥ प्रस्तुताप्रस्तुतवृत्तांतयोः शाब्दोपात्तयोरैक्यसमारोपएव तस्याः समुन्मेषात्॥ यदि विष
यविषयिणोः शाब्दोपात्तयोः प्रवर्तमानएवालंकारो विषयिमात्रोपादानेपि स्यात्तदारूपकमेवमभेदेपभेदरूपा
यातिशयोक्तेरपिविषयमात्रमेतल्लनन्तातहोत्र प्रस्तुतनायकादिनिगरणेन तत्रशाब्दोपात्ताप्रस्तुतानिएप्रभे

कुवलयानंद
५६

वाच्यश्च सादृश्यातिभेदेऽर्थाभेदरूपातिशयोक्तिरस्तु एवं तर्हि सारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेपि सैवातिशयोक्तिः स्या
दङ्गास्तु तथापि कत्वान्नभवतीति चेत् न तत्राप्रस्तुतधर्मिवाचकपदस्यापि प्रसिद्धातिशयोक्त्युदाहरणेष्विव प्रस्तु
तधर्मिलक्षकत्वसंभवात् ॥ नन्वप्रस्तुतप्रशंसायां सारूप्यादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थोऽवगम्यते न
त्वतिशयोक्ताविव विषयिवाचकैस्तन्नात्पदैर्विषयालक्ष्यंत इति चेत् ॥ नहि तत्रापि प्रस्तुतगतात्वप्रस्तुतवृत्तां
तरूपाद्वाक्यार्थात् ज्ञातप्रस्तुतवृत्तांतरूपो वाक्यार्थोऽवगम्यत इत्यतिशयोक्तितो भेदोऽस्तु वस्तुतस्तु सोपवै
रसानाविपर्ययविषिसत्कर्णोयोश्चापलं दर्शितामहविस्मृतत्वपरदृष्टिं भूपसोत्केनवा ॥ सर्वविसंवादान
त्विभ्रमरहेपद्वारणोचाप्यतावंतः शून्यकरोनिषेध्यत इति भ्रातः क एष गहनः ॥ इत्यापच प्रस्तुतप्रशंसोदाह
श्र. रणोप्रथमा[illegible]मधीतीनादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थोऽवगम्यत इत्येतन्नवदते अप्रस्तुते वारणस्य भ्र
मराते व त्वके करोचापलमात्रस्य भ्रमरनिरासकारणस्य हेतत्पसंभवे पिरसनाविपर्ययात्तः शून्यकरत्वपो
हेतुत्वोसंभवेन मदस्य प्रत्युतततोव्यात्व एवहेतुत्वेन रसनाविपर्ययादीनां तत्र हेतुत्वात्प्रत्पार्थेवारणपर
स्यहुष्मभूतरूपविषयत्रोडीकारेणैव प्रवृत्तेर्वक्तव्यत्वादेवं सत्यपि पद्यप्रस्तुतसंबोभनादि विच्छित्तिविशेषा राम
५६

लत्राप्रस्तुतप्रशंसापात्रातिशयोक्तितो भेदो घटतेत तत्रापि प्रस्तुतं स्वपदेन निर्दिश्यते तत्राप्रस्तुतवर्णना
पस्य विच्छित्तिविशेषस्य सद्भावान्न ततो भेदः स्तुतं घटते ॥ पद्मपत्नीलोत्पलद्वंद्वात् ॥ वापीकापिस्फुरति गग
ने तत्परं सूक्ष्मपद्येत्यादिषु प्रस्तुतस्य कस्यचिद्धर्मिणः स्ववाचकेनानिर्दिष्टत्वातिशयोक्तिरेव ॥ एतेन
गतजलसेतुबंधवर्णनादिषु अप्रस्तुतधर्मिसंबंधवर्णनरूपातिशयोक्तिरस्तीति शंकानिरस्ता तथा स
ति कस्त्वं भोः कथयामीत्यादावपि तत्प्रसंगात् ॥ सारूप्यनिबंधनप्रस्तुतवाक्यार्थावगतिरूपविच्छित्तिवि
शेषेयालंकारांतरकल्पनं विहायापितत्प्रस्तुतस्मात्सर्वालंकारत्वलक्षणमिदं लक्षितं ॥ यथा वा ॥ कस्त्वंप
भवीवेथः हत्वाल्पविशापामतिः ॥ तितीर्षु दुस्तरं मोहादुडुपेनास्मि सागरं ॥ अत्रापि निदर्शनाभ्रांतिर्न कर्त
व्या ॥ इदं श्यामत्या सूर्यवंशवर्णापेत्तु मिच्छुरहमितिप्रस्तुतार्थानुपपत्त्याभावात् ॥ तत्प्रतिबिंबाप्रस्तुतार्थवर्ण
नादौ विशमालंकारविकल्पासेन च वैवलं तात्पर्यस्य गम्यमानत्वात् ॥ यथा वा ॥ अनापि देशः कतम
त्त्वयापूर्वसेतभूत्कामस्पदर्शवनस्य ॥ त्वदाप्नुसकेतया कृतार्थी[illegible]श्र[illegible]व्यापिनानेन जनेन संज्ञा ॥ अ
त्र कांतमोदेश्यस्त्वया परिपृच्छ इति प्रस्तुतार्थमनुपपन्नस्य वसंतम्रुकं तत्पद्रशामनायीतिप्रतिबिंब

मताऽर्थमासाल्लकिताऽलंकारः॥ उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणं॥ तामेवध्यायतेतस्मैनिसृष्टासैवदूति
का॥ उत्कंठाइच्छाविशेषः॥ सचेंद्रियसुखोत्साहोपचात्तीत्यभिमन्यते॥ तत्प्राप्त्यौत्सुक्यंसंकल्पामुत्कंठांव
वयोविदुरित्युक्तलक्षणं॥ तद्विषयस्यतदुपायसंपादनयत्नंविनासिद्धिःप्रहर्षणामुदाहरणंस्पष्टं॥ यथा
वा॥ मेघैर्मेदुरमंबरंवनभुवःश्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय॥ इत्थंनंद
निदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः॥ अत्रराधामाधवयोः
परस्परमुत्कंठितत्वंज्ञासिद्धतेर॥ अगनेच्चानंथकारेणानिबद्धमित्यप्रहर्षणोदाहरणेलक्षणानुगतिः॥ वांछिताद
धिकार्थस्यसंसिद्धिश्चप्रहर्षणं॥ दीपमुद्योतयेद्यावत्तावदभ्युदितोरविः॥ यथावा॥ चातकस्त्रि
चतुरान्पयःकणान्याचतेजलधरंपिपासया॥ सोपिपूरयतिविश्वमंभसाहंतमहतामुदारता॥ यत्ना
दुपायसिद्ध्यर्थात्साक्षाल्लाभःफलस्यच॥ निध्यंजनौषधीमूलंखनतासाहूतहेतमहतामुदादृष्टोनि
धिः॥ फलोपायप्राप्तिसिद्ध्यर्थाद्यत्नान्मध्येउपायसिद्धिमनपेक्ष्यसाक्षात्फलस्यैवलाभोपिप्रहर्षणं॥ यथानि
ध्यंजनसिद्ध्यर्थंमूलिकांखनतस्तत्रैवनिधेर्लाभः॥ यथावा॥ उच्चिनुप्रथममधःस्थितंमृगाक्षिपुष्पो

त्वंस्थितविटपंगृहीतुकामा॥ आरोढुंपदमदधादशोकयष्ट्यामत्रैवपुरपितेनपुष्पितामगा॥ अत्रपुष्पग्रहणो
पायस्ततारोहसिध्यर्थात्प्रवृत्तिनात्रैवपुष्पग्रहणालाभः॥ इष्यमाणविरुद्धार्थसंप्राप्तिस्तुविषादनं॥ दीप
मुद्योतयेद्यावन्निर्वाणस्तावदेवसः॥ यथावा॥ रात्रिर्गमिष्यतिभविष्यतिसुप्रभातंभास्वानुदेष्यतिहसिष्यति
हसिष्यतिपंकजश्रीः॥ इत्थंविचिंतयतिकोशगतेद्विरेफेहाहंतहंतनलिनींगजउज्जहार॥ एकस्यगुणदो
षाभ्यामुल्लासोन्यस्यतौयदि॥ अपिमांपावयेत्साध्वीस्नात्वेतीच्छतिजाह्नवी॥ कांधिपंकुचयोःस्पर्शोकांत्यःपद
पद्मयोः॥ निंदंतिचविधातारंत्वद्धाटीषुरिपोषितः॥ तद्भाग्यंधनस्यैव॥ लाभोपमेवभूपालसेवकानांनचे
ह्यः॥ कस्यचिद्गुणेनान्यस्यगुणःदोषेणदोषोगुणेनदोषःदोषेणगुणोवायद्वर्ण्यतेसउ ल्लासः॥ द्विती
यार्द्धमात्रस्योदाहरणं॥ तत्रपतिव्रतामहिमगुणेनस्नानतोगंगायाःपावनत्वगुणोवर्णितः॥ द्वितीयश्लोको
द्धितयस्योदाहरणं॥ अत्रराज्ञोधाटीषुपलायमानानामरिपोषितांपरयोर्वावनपरियेयिमार्दचदोषेणत
योःकांतिमस्पृष्टयर्थंकुचयोःस्तवनतोधातुर्निंदनदोषोवर्णितः॥ तृतीयश्लोकस्तृतीयचतुर्थयोरुदा
हरणंतत्रसज्जनमहिमगुणेनधनस्यतदनाश्रयणदोषत्वेनवर्णितः॥ चौर्यदोषेणतत्तत्सेवकानांवं

कुवलयानंदे
४८

विनानिर्गमनं गुणत्वेन वर्णितं॥ अनेनैव क्रमेणोदाहरणांतराणि पद्यं यथा संसीमादृसेनां सोनिपादितः॥ एक
हृतीमदंगेषु शेषमंगंभवोमर॥ अत्र नायिकासौंदर्यगुणेन तदंसपादितस्य हासंस्पर्शमित्र गुणो वर्णितः॥ नो
कानंदनचंदनद्रुमसखेनास्मिन्वनेस्थीयतां दुर्वर्णैः कटिनैरसालं हृदयेरक्रीतमेतद्वनं॥ तेऽन्योन्यातिपर्व
ज्ञातदहनज्वालालीवलीसंकुलानत्वान्येव तुल्या निकेवलमिदं सर्वं दहेयुर्वने॥ अत्र वेणूनां परस्परसंघर्षे
ज्ञातदहनज्वालासंकुलत्वदोषेण वननाशस्य दोषो वर्णितः॥ दानार्थिनो मधुकरा यदि कर्णतालै
र्दूरीकृताः करिवरेण मदांधबुध्या॥ तस्यैव गंडयुगमंडनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति॥ अत्र भ
मराणां पलंकारत्वगुणो न गजस्य तत्त्वाजिह्योद्देषत्वेन वर्णितः॥ आघ्रातं परिचुंबितं परिमुहुर्लीढं पुनश्च
र्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः॥ हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादरादंतःसा
रविचारणाव्यसनिना चूर्णीकृतं नाश्मना॥ अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन
वर्णितः॥ अत्र प्रथमचतुर्थयोः श्लोकोऽत्रार्थः॥ मध्यमयोः छिन्न्यायेनल्लासिकः॥ ताभ्यां तौ पदिनस्यात
ममवज्ञालंकृतिस्तसा॥ स्वयमेवाकुलमते प्रस्थं प्राप्यापि सागरं॥ मीलंति यदि पद्मानि का हानिरमृतद्युतेः॥

राम०
४८

ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ॥ अत्र कस्यचिद्गुणेनान्यस्य गुणालाभे द्वितीयार्धमुदाहरणं॥ दोषेणादो
षस्याप्राप्तौ तृतीयार्धं॥ यथा॥ मदुक्तिश्चेदंतर्मदयति सुधीभूय सुधियः किमस्या नाम स्यादरसपुरुषानादर
भरैः॥ यथायं न स्वद्वत्परमरमणीयापि रमणी कुमाराणामंतःकरणहरणं नैव कुरुते॥ त्वचेतसेचरसेवखेण
लच्युताकानाम दिग्दंतिनां व्यालैः केकराभवणानि कुरुषे हानिर्न हम्मामपि॥ मर्दैन्यं कुरुषे जडां शुभ
पशः किं नाम लोकत्रयीदीपस्यांबुजवांधवस्य जगतामीशोसि किं ब्रूमहे॥ अत्राद्येकवितारमणगुणा
भ्यां श्रवणतालहतदंतयोल्लाभ गुणाभावो वर्णितः॥ द्वितीये परमेश्वरानंगीकारदोषेणादिग्गजादीनां ल
घुतादिदोषाभावो वर्णितः॥ दोषः स्यादभ्यर्थनानुज्ञातैव गुणादर्शनात्॥ विपदः संतु नः शश्वद्यासु संकी
र्त्यते हरिः॥ यथा वा॥ मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे॥ नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षति॥ इ
यं हनुमंतं प्रति राघवस्योक्तिः॥ अत्र प्रत्युपकाराभावो दोषः॥ तदभ्युपगमहेतुर्गुणो विपत्त्याकांक्षा अ
प्रसक्तेः॥ सा च व्यतिरेकमुखप्रयुक्तेन सामान्येन विशेषसमर्थनरूपेणार्थांतरन्यासेन दर्शिता॥ यथा वा॥
मजेमभवरेतिकेपत्नीति मे त्वयैशाचकामित्यमरसंपदः प्रथमनाथनाथामहे॥ भवद्गुणनरेहली विकच

कुवलयानंद॰
४९

तडइदं गृहंगतिस्फुरन्मुक्तकोयिभिर्मनवरादिभिर्मंसते॥ लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं॥ अखिलेषु
विहंगेषु हंत स्वछंदचारिषु॥ शुक पंजरबंधस्ते मधुराणां गिरां फलं॥ दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वक
ल्पनं च लेशः॥ राज्ञो बहुमते विदुषि पुत्रे चिरं राजधान्यां प्रवसति तद्दर्शनोत्कंठितस्य गेहस्थपितुर्वचनं
अप्रस्तुतप्रशंसारूपं॥ तत्र प्रथमार्द्धे इतरविहगानामवक्तृत्वदोषस्य स्वछंदचारणामनुकूलतया गुण
त्वं कल्पितं॥ न चात्र व्याजस्तुतिराशंसनीया॥ नह्यत्र विहंगांतराणां स्तुत्याव्याजेन निंदायां शुकस्य निंदाव्या
जेन स्तुतौ च तात्पर्यं॥ किंतु पुत्रदर्शनोत्कंठितस्य दोषगुणयोर्गुणत्वदोषत्वाभिमान एवात्र श्लोके निब
ध्यावाद्यः॥ सतः सच्चरितोद्वेगो सनिनः॥ प्राङ्भवेघंत्ररणाः सर्वत्रैव जनापवादचकिता जीवंति दुःखं
सदा॥ अव्युत्पन्नमतिः कृतेन न सता नैवसता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृत
दृशी न चोद्धृतहार॥ पूर्वेषगुणवान्राजा योग्यस्ते पतिरूर्जितः॥ रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि
॥ चपलो निर्दयश्चासौ जनः किं तेन मे सखि॥ आगःप्रमार्जनायैव चाटवो येन शिक्षिताः॥ अत्र चापरश्लोके राज्ञो वी
रोत्सेकः स्तुतिः॥ कन्यायाश्चानिरंतभोगान्निर्वेदो दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धसख्या राज्ञकोपपर राम॰
४९

ङ्गिहार्थंपास एव दोषो गुणत्वेन वर्णितः॥ उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्त्या पापिता सामग्रतोम
नपरित्वहानुगुणं प्रतिज्ञाय तदनिर्वाहमाशंकयातया सखीनामुपहासं परिजिहीर्षया नापि कयातस्य चाटु
कारिता गुण एव दोषत्वेन वर्णितः॥ न चाद्यश्लोके स्तुतिनिंदायां पर्यवसायिनी॥ द्वितीयश्लोके निंदापर्यवसा
यिनीति व्याजस्तुतिराशंकनीया॥ राजप्रकोपपरिहारार्थं हि निंदास्तुत्योरन्याविदितत्वेनोक्तत्वात् एवोदाहृतेन ततो वि
षयशक्ति॥ वास्तवस्तु इह व्याजस्तुतिसम्भवोपि न दोषः॥ न ह्येतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावः प्रसज्य
ते॥ तदुक्तौ गुणयोरपि लेशोदाहरणयोर्दर्शितत्वात्॥ नापि व्याजस्तुतिमात्रस्य लेशांतर्भावः प्रसज्यते॥ भिन्न
विषयव्याजस्तुत्युदाहरणे कस्त्वं वानर राममर्चद्रभवने लेखार्थसंवाहकोण्यद्दंताप्रहरीश्वसेयनितां
वृत्तेन चाटुभ्रमपेत्यादिषु दोषगुणाकरणस्य गुणदोषीकरणस्याभावात्॥ तत्रान्यगुणदोषाभ्यामन्यत्र गु
णदोषयोः प्रतीते॥ विशेषे कोपि इंदोर्लक्ष्म त्रिपुरजपिनः कंठमलं मुरारेर्दिग्नागानां मदजलमषीभांडिगं
डस्थलानि॥ अद्याप्युर्वीवलयतिलकश्यामलिम्नानुलिप्तान्याभासंते वदत वधवलं किं यशोभियो॥ स्तवरपेदिशा
मुदाहरणे लेशस्य स्पर्शनात्॥ अत एव इदं लक्ष्मादिधवलीकरणाभावदोष एव गुणत्वेन पर्यवस्यति किंतप

रिसंख्यारूपेणततोऽन्यत्सर्वंव्यवलितमित्यन्योग्यगुणःप्रतीयते॥ क्वचिद्व्याजस्तुत्युदाहरणेषुगुणदोषीकरणा
त्वपिस्तुतेर्विषयांतरमपिदृश्यतेयथा॥ सर्वदासर्वदोसीतिमिथ्यासंस्तूयसेबुधैः॥ नारयोलेभिरेपृष्ठंनवक्षःपरयो
षितः॥ अत्रहिवान्ययांनिरयापरिसंख्यारूपेणततोऽन्यत्सर्वंमभिमतं॥ अर्थिनांदीनारादीयतइतिस्तुत्यं
तरमपिप्रतीयते॥ एवंयेषूदाहरणेषुकृतेशौर्यंमदेयोद्भिन्नत्यादिषुगुणादोषीकरणादिकमेवव्याजस्तुति
रूपतयावतिष्ठते॥ तत्रलेशव्याजस्तुत्योःसंकरोस्तु॥ इत्यत्यतेवहिव्याजस्तुत्यप्रस्तुतप्रशंसयोरपिप्रावसं
करोदर्शितः॥ सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैःपदैः॥ नितंबगुर्वीतरुणीदृग्युग्मविपुलाचसा॥ अत्रना
यिकावर्णनपरैनास्यानुष्टुभोविपुलानामतत्त्वरूपस्यसूच्यार्थस्यसूचनंमुद्रा॥ यद्यप्यत्रग्रंथेध्वजनाम्नोनाल
सूचनीयत्वंतथाप्यसोत्तरार्द्धेमलंकलक्षणायुक्तच्छंदःख्यापयतीतितेनतस्यसूचनीयत्वमस्तीति
तदभिप्रायेणलक्षणोयोऽस्मे॥ एवंरत्नमालायांतद्वृत्तनामनिवेशनेनतन्नामकंकुरंविहारिकसूचनं
अत्राश्मिनालायामग्निदेवतानांमूर्तिनिरूपणत्सूचनमित्याहावपमेवालंकारः॥ एवंनाटकेषुवक्ष्यमाणा
र्थसूचनेयपि॥ क्रमिकप्रकृतार्थानांन्यासंरत्नावलीविदुः॥ चतुरास्यःपतिर्लक्ष्म्याःसर्वज्ञस्त्वंमहीपते॥ राम० ५०

अत्रचतुरास्यादिपदैर्वर्णनीयस्यब्रह्मविष्णुरुद्रात्मतापिप्रतीयतइतिप्रसिद्धसहपाठानांब्रह्मादीनांक्रमेणनि
वेशनेरत्नावली॥ यथावा॥ रत्नानिविपुलांकुचनेकृतिनावासेरसालिंगितेप्रह्णादेकरसेक्रमादुपचितेमध्य
मेहृत्तापहे॥ कोकस्पर्द्धिनिभोगभाजिजननितानंगेखलीनोन्नकेवैमातिश्रीरमणावतारदशकंबालेभ
वत्यास्तने॥ प्रसिद्धसहपाठानांप्रसिद्धक्रमानुसरणोप्ययमेवालंकारः॥ यथा॥ यस्यवह्निमयोहृदयेषु
जलमयोलोचनपुटेषुमारुतमयःश्वसितेषुक्षमामयोंगेषुआकाशमयःस्वांतेषुपंचमहाभूतमयोमूर्जेर
वादृश्यतनिहतप्रतिसामंतांतःपुरेषुजनायशः॥ एवंषट्कलायानुग्रहादीनांप्रसिद्धसहपाठानांयथाकथंचि
त्प्रतीयमानोयरंजकतादिप्रकारेणनिवेशनेरत्नावल्यलंकारः॥ प्रकृतानपविनाक्रमिकतत्तन्नामा
श्लेषभंग्यानिवेशनेप्ययमेवालंकारः॥ तद्गुणःस्वगुणत्यागादन्यदीयगुणग्रहः॥ पद्मरागायतेनासा
तेऽधररत्विषा॥ यथावा॥ वीरत्वद्रिपुरमणीपरिधानंपल्लवानिसंस्पृश्य॥ नहरतिवनभुविनिजकरकहर
चितचितानियांउपत्रमपियापुनस्वगुणसंप्राप्तिःपूर्वरूपमुदाहृतं॥ हरकंठांशुलिप्तोपिशेषस्त्वद्यशसा
सितः॥ यथावा॥ विभिन्नवर्णागरुडाग्रजेनसूर्यस्यरथ्यापरितःस्फुरंत्या॥ रत्नैःपुनर्यत्ररुचारुचंस्वमानि

कुवलयानंदः ५१

न्निरेवंश्यकराःस्तीलैगात्रूपमेवतद्गुणाः इतिकेचिद्व्याजहुः॥ पूर्वावस्थानुवृत्तिश्चविकृतेसतिवस्तुनि॥ दीपेनि
र्वापितेप्यासीत्कांचीरत्नैर्महन्महः॥ लक्षणोच्चकात्पूर्वरूपमितिलक्ष्यवाचकपदानुवृत्त्यथावा निद्रारंखंडि
मिराध्वतबहिरपिप्रसिन्नंगंडेर्गजैरंजःकंचुकिमिलेसन्नरोधैरैरथ्यासितात्मसमयः॥ आक्रांतेमहिषीभिरेवय
पनंत्वद्विषांमंदिरेराजन्तेवचिरंतनप्ररापिनीष्वन्येपिराज्यस्थितिः॥ संगतान्यगुणागीकारमाहुस्तद्गुणं॥ चि
रंरागिणिमच्चित्तेनिहितापिनरनड्स्यसि॥ यथा॥ वा॥ गंडाउंभोगेविहरतिमदैःपिच्छिलेदिग्गजानांवैरिस्त्री
णांनयनकमलेचंजनानिप्रमार्ष्टि॥ यद्यप्येषाहिमकरकएद्देतसौवत्तिकीतेकीर्त्तिर्दृष्टस्सुरतितदपिश्री
नहिहक्षितीद्र॥ ननुचान्यगुणोनान्यत्रगुणोदपत्तद्योनैतस्यैवगुणास्यसंक्रमणासंक्रमेणोकिंतसद्
भूपदेशेनसद्दसद्दसन्निद्वेषायोर्ह्मीनोत्पत्यनुत्पत्तिवत्तद्गुणाजन्यत्वेनसंभावितयोर्गुणांतरपोत्पत्यनुत्प
त्तीतद्गुणातद्गुणयोःपुनर्गुणशब्दोरूपरसगंधादिगुणवाचीतत्रान्यदीयग्रहणंमहरोच्चरत्नस्फटिकवस्त्र
मालिन्यादिन्यायेनान्यदीयगुणोनैवरंजनारंजनेविवक्षितेतथैवचोसहरणानिदर्शितानि॥ यद्यप्यवज्ञा
हतिरतद्गुणाच्चविशेषोक्तिविशेषावेव॥ कार्याजनिर्विशेषोक्तिःसतिपुष्कलकारणे इतितत्सामान्यलक्ष राम॰ ५१

णाक्रांतत्वात्॥ तथाप्युल्लासप्रतिद्वंद्विनाविशेषालंकारेणालंकारांतरपायरिगणितावितिध्येयं॥ प्रसिद्ध
स्यगुणोत्कर्षोल्लयणाःपरसंन्निधेः॥ नीलोत्पलानिदधतेकटाक्षैरतिनीलतां यथावा कपिरपिचकापिशा
यनमदमत्तोवृश्चिकेनसंदष्टःतो॥ अपिचपिशाचग्रस्तःकिंब्रूमोवैहतंतत्र॥ कपित्वजात्यास्वतःसिद्धस्य
वैकृतस्यमद्यसेवावृश्चिकदंशादिभिरुत्कर्षः॥ मीलितंयदिसादृश्याद्भेदएवनलक्ष्यते॥ रसोनालक्षिलाक्षायाश्चरणे
सहजारुणेयथावा॥ मल्लिकामालभारिण्यःसर्वांगीणार्द्रचंदनाः॥ क्षौमवत्योनलक्ष्यंतेज्योत्स्नायाममभिसा
रिकाः॥ अत्राद्येचरणालक्तकरसयोरुणिमगुणसाम्यात्भेदानवध्यवसायः॥ द्वितीयेसहरराचंद्रिकाभि
रभिसारिकाणांधवलिमगुणसाम्याद्भेदानध्यवसायः॥ सामान्यंयदिसादृश्याद्विशेषोनोपलक्ष्यते॥ पद्मा
करप्रविष्टानांमुखंनालक्षिसुभ्रुवां॥ यथावा॥ रत्नस्तंभेषुसंक्रांतप्रतिबिंबशतैर्वृतः॥ लंकेश्वरःसभा
मध्येनज्ञातोवालिसूनुना॥ मीलितालंकारेएकेनापरभिन्नस्वरूपानवभासरूपंमीलनंक्रियते॥ सामान्या
लंकारेतुभिन्नस्वरूपावभासेपिव्यावर्त्तकविशेषोनोपलक्ष्यतेश्यव्रकांतरतयाभानमस्त्येवं॥ तद्इतिभेदः॥
मीलितेसहरणोचरणादेर्वस्तंतरत्वेनागंतुकंयावकादिनावभासतेसामान्येसहरणोत्पन्नानांमुखा

कुवलयानंद
५२

नांच व्यक्तं तरतया मानमस्त्येवं॥ तथा एव यास्तत्प्रतिबिंबानांच॥ किंचिदंप्रमिदं मलवमयं बिंबोपप्रति
बिंबइति विशेषः यदं नोपलक्ष्यते॥ अत एव भेद तिरोधानां मीलितं तद तिरोधानेपि साम्येन व्यावर्त्तेद
नवभासे सामान्यमिति मुभयोर्व्यवच्छेदं वदंति॥ केचित्तु वस्तुद्वयस्य लक्षणसाम्यात्तयोः हैनचिद्दली
पसात दन्यस्य स्वरूप तिरोधाने मीलितं स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधानेपि सामान्यं॥ एवं
च॥ अपांगतरले दृशौ तरलवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखं॥ इति स्फुरति म
गकेमृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते इत्यत्र मीलितालंकारः॥ अत्र रकु
तारल्यादीनां नारीवपुषः सहजधर्मत्वान्मदोदयकार्यत्वाच्च तद्धर्मयसाधारणाद्धतल्पजातारल्यादिधो
गिना वपुषा मदोदयस्य स्वरूपमेव तिरोधीयते लिंगसाधारण्येन तन्मूलानो पायाभावात मल्लिकामालभारि
णि इत्यादिषु तु सामान्यालंकारः इत्याहुः॥ तन्मते पद्माकरप्रविष्टानामित्यादौ भेदाध्यवसायेपि व्यावर्त्तका
स्फुरणेनालंकारांतरेणाभावा॥ सामान्यालंकारपवांतरभेदेन वा पर्वाक्समन्मते स्वरूपतिरोधाने अलंकारांत
रभावे॥ मिलितावांतरभेदेन वा॥ भेदवैशिष्ट्ययोः स्फुर्तावुन्मीलित विशेषकौ॥ हिमाद्रिं त्वद्यशोमग्नं स्वरा
श्रीतेव्र्जानते॥ लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च॥ मीलितन्यायेन भेदानध्यवसाये प्राप्ते कुतो राम०
५२

पिहेतो र्भेदस्फूर्त्तौ मीलितप्रतिद्वंद्विउन्मीलितं तथा सामान्यरीत्या विशेषास्फुरणेप्राप्ते कुतश्चित्कारणाद्विशेषस्फु
र्त्तौ तदाभावे हृद्दोति विशेषकः॥ क्रमेणोदाहरणद्वयं॥ तद्गुणरीत्या पि भेदानध्यवसायेप्राप्ते उन्मीलितं
ध्यते॥ यथा॥ वत्पद्गांगदेहा सप्रसरसहचरैस्तावकानै यशोभिर्धावल्यं नीयमाने त्रिजगति परितः श्रीनसि
५४ हस्तिनीदू॥ नेदगयचैना भी कमल्ल यरिमलप्रौढिमा सादृपिष्टे वानांनाम विष्यत्कथमपि कमलावाम
कुस्याववोधः॥ काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः॥ वसंतकाले संप्राप्ते काकः काकः पिक
पिकः॥ इदं विशेषकस्योदाहरणांतरं॥ अत्र दितायो काकपिकयो र्भेदो कालेन ज्ञातः॥ पिकाचेन्नार
दत्य र्थांतरसंक्रमितवाच्यो॥ यथावा॥ कांता रासीवा सवतोंङ्गनानां साधारणोंशकादूलांछनेवपि॥ प्रा
र्थ्यप्रहारवणमन्त्रमागप्राचीनमीशं प्रकटीकरोति॥ किंचिदाकूतसहितस्मितद्योतरमणीनां॥ पत्रा
सौवेतसीषोष्यतचेयं सततसरिति॥ तारिश्वर नामा गौड छंतेप्रतिकामयमानायाअत्तरामिदं वेतसीपं
थकुंजेस्वाछंयामिःत्याकृतं॥ ग्नोमे स्मिन्प्रस्तरप्रायेन किंचित्पांथ विद्यते॥ पयोधरोन्नतिं दृष्ट्वा वस
मितिचेद्दसा॥ अविदग्धजनमायेऽस्मिन्नामे कविरवगमिष्यती येतापेता दर्पाप्रतिबंधकवि

रकुवलयानंदः
५३

विदूषिनास्तीति हृदयं॥ इदमुत्तरं पप्रश्नस्योत्तरस्योदाहरणं॥ निबद्धप्रश्नमुत्तरं यथा॥ कुशलं तस्या जीवति कु
शलं पृच्छामि जीवतीत्युक्तं॥ पुनरपि तदेव कथयसि मृतां तां नु कथयामि या श्वसिति॥ ईर्ष्यामानानंतरं अन्य
प्रानायिकापार्श्वात् सखीमागतां प्रति कुशलं तस्या इति नायकप्रश्नः॥ जीवतीति सख्यानुत्तरं॥ जीवंत्याः कु
तः कुशलमिति तदभिप्रायः॥ अन्यच्च मन्युदुत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति प्रश्नः॥ पृष्ठस्योत्त
रमुक्तमभिप्रायेण जीवतीत्युक्तमिति सख्या वचनं सखीवचनोद्घाटनार्थं पुनरपि तदेव कथयसीति नाय
नायकस्याक्षेपः॥ मृतां नु कथयामि या श्वसितीति सखाभिप्रायोद्घाटनं॥ प्रायेण तस्याः कुशलं भवति मदागम
नसमये विश्वासेषु संचरत्सु कष्टं यतां मृतां कथयेयमित्यभिप्रायः॥ प्रश्नोत्तरांतराभिन्नमुत्तरं॥ चित्रमु
च्यते॥ केदारपोषणरताः के खेटाः किं चलं वपुः॥ अत्र केदारपोषणरता इति प्रश्नाभिन्नमुत्तरं॥ के खेटा
श्चलं इति प्रश्नद्वयस्य वपुरित्येकमुत्तरं॥ उदाहरणांतराणि विदग्धमुखमंडने द्रष्टव्यानि॥ सूक्ष्मं परा
शया भिङ्गीतरसाकूतचेष्टितं॥ मपि पश्यति ता वैशैः सीमंतमणिमावृणोत्॥ कामुकस्य वल्लो केनेसंके
तकालप्रश्नं भावेज्ञा लवतया शेषयं॥ अस्तंगते सूर्ये केसंतकाज्ञ इत्याकूतं॥ यथा वा॥ संकेतकालमनं रम०

५३

संविदं ज्ञात्वा विदग्धया॥ आसीत्नेत्रार्पिताकूतं लीलापद्मं निमीलितं॥ पिहितं परखनां तत्तातः साकूतचेष्टितं॥
प्रिये गृहागते प्रातः कांता तल्पमकल्पयत॥ रात्रौ सपत्नीगृहे श्रांतोसीति तल्पकल्पनाकृतं॥ यथा वा वत्र स्प
द्धि स्वेदबिंदुप्रबंधे दृष्ट्वा भिन्नं कुंकुमं कापि कंठे॥ पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पाणौ खड्गलेखां लि
लेख॥ अत्र स्वेदाभिन्नं पुरुषायितपुरुषोचितखड्गलेखनेन प्रकाशितं॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य
गोपनं सखि पश्य गृहारामपरागैरस्मि धूसरा॥ अत्र स्वैरं रतान्ते तमपष्टलुठनलग्नपंकेलीजालस्य गोपं॥
यथा वा॥ कस्या वा न भवेद्रोषः प्रियायाः सव्रणाधरे॥ सभृंगं पद्ममाघ्रासी वारितापि मया युना॥ उपपतिना
खंडिताधराया नायिकायाः सकाशमागच्छंतं प्रियमन्यथयं त्येवः सख्या नायिकां प्रति हितोपदेशव्याजेन त
प्रति नायिकापराधगोपनं॥ छेकापह्नुतेरस्याश्चायं विशेषः॥ यत्र स्यो वचनस्यान्यथा नयनेनापह्नवाः॥
अत्र स्वाकारस्य हेतोः खंडितो गोपनमिति लक्षणो लक्षगतास्ति चोक्तिः महत्त्वाकारस्य नोपनार्थहेतुं
तरमुत्पाद्य केयापारमात्रोपलक्ष्यते तत्स्था॥ आयांतमालोक्य हरिं द्रागेत्या माल्याः पुरस्तादनुरागमेव॥
रोमांचकंपादि मिहच्यमानं भामोत्तु गृहप्रतामंत्पथेन मित्यचापि व्यामाल्याः पुरस्तादनुरागमेव जोनिसेव॥

कुवलयानंद ५४

तत्र खण्डनुरागकृतस्य रोमाञ्चाद्याकारस्याभक्तिरूपत्वं तत्प्रख्यापकेन प्रमाणेन गोपनं कृतं॥ सूक्ष्मपिहितालंकारयोर
पिवेचितु गम्हराणुद्दिष्टभावाचरणव्यापारमात्रोपलक्षणं॥ तत सूत्रं॥ अलिनी दलेवलाका मरकतपात्र इव दृश्यते
ति॥ इतिमम संकेतसमुद्विज्ञाताभावं तद्द्वाराव्वीणालीमित्यादि पूर्वसूक्ष्मादयलंकारः प्रसरति॥ अत्र स्त्रीयेता
वत् किमावयोः संकेतस्थानं भविष्यतीति प्रश्नाशयं सूचयति कामुके॥ तदभिज्ञया चिरं व्ययातदासखी प्र
ति साकूतं मुक्तामिति सूक्ष्मालंकारो भवन्नियतोत्र चंवलाकापाः मरकतपात्र प्रतिष्ठितशंखपुपमपातस्या भि
ख्लावेनाख्यत्तं वितेन तस्य प्रदेश्यस्य शानिर्दृनं वेतेन तद्देवावयोः संकेतस्थानमिति कामुकं प्रति सूचनं चल
क्ष्यते॥ न चात्र ध्वनिराशंकनीयः॥ दूरे व्यज्यमानस्यापि संकेतस्थानप्रश्नोत्तरस्य तोन्यो वा विहतत्वात्॥ एवं पिहि
तालंकारेपि तदुदाहर्तव्यं॥ इदं चान्यत्राव धेयं॥ यत्रासौ वेतसीपांथेत्यादिषु गूढोत्तरसूक्ष्मपिहितव्याजो
क्त्युदाहरणाभावो नत्वो न्या विहतः किंतु वस्तु सौंदर्यबलाद्बोद्धव्य विशेषविशेषितान्नस्य॥ तत्र वस्तु
नोलंकारत्वद्युतिभावासदत्वात्॥ प्राचीनैः त्वोन्यविषयरणेसत्यलंकाराः स्य दत्तात्तीत्युदाहृतत्वाद स्माभि
रप्युदाहृतानि॥ शत्नाहि पत्रासौ वेतसीपांथ तत्रैयंस्तत रासरिद्दिति पथंतम बोने कामिन्या हतस्त च नं इत्याद्य राम० ५४

र्थान्तरकल्पनया भावाविष्करणमित्यतः प्राग्निरीतेषु दाहरणेषु येषु संकेतकालमनसंपुंस्त्वं तन्व्यां व्यंजयंतीमा
मा उगूहेति भावाविष्करणमस्तीति तेष्वेव तन्नद्दलंकार इति॥ गूढोक्तिरन्योपदेश्यं चेद्यदन्यं प्रतिकथ्यते॥ वृषा
पेहि परक्षेत्रादायाति क्षेत्ररक्षकः॥ यं प्रति किंचिद्वक्तव्यं तटस्थे यदि विज्ञापीति तदेवतदन्यं किंचित्प्रति श्लेषेणो
च्यते चेत्सा गूढोक्तिः॥ वृषेत्याद्युदाहरणं॥ इह यकलत्रमुपभुंजानं कामुकं प्रति वक्तव्यं परक्षेत्रेस्याभिश्च
पंतस्य स्त्रीणां किंचित्समीपे चरंतं निर्दिश्य कथ्यते॥ नेयमप्रस्तुतप्रशंसा॥ कार्यकारणत्वादिव्यंग्यत्वाभावात्॥ ना
पि श्लेषमात्रं॥ अप्रकृतार्थस्य प्रकृतार्थो च पित्वेनाविवक्षितत्वात्॥ तस्य केवलमितरवंचनार्थं निर्दिष्टत्वात्प
विशिष्टविशेषसम्भवात्॥ यथा॥ नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां त्वत्कामा मिह पुष्पितेति
गुरवः प्राप्तायद्वाप्यं तरं॥ शय्यामात्रसहायिनीं परिजनः श्रांतो न मां सेवते मित्यौत्तागमलालनीपरजनील
क्ष्मीपतेरक्षमां॥ अत्र लक्ष्मीपतिनाम्नो जारस्यागमनं प्रार्थयमाना यासा तटस्थवंचनाय भगवंतं प्रत्याक्रो
शस्य प्रत्यायनं॥ विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि॥ वृषापेहि परक्षेत्रादिति वक्ति ससूचनं॥ श्ले
षेण गुप्तं वस्तु यथा॥ वत्से मा गा विषादं श्वसनमुरुजवं संत्यजोर्ध्वप्रवृत्तं कंपः को वा गुरुस्ते किमिह बलभिदा

जामितेनाऽत्र पाहि॥ प्रत्यानेतुरागामिति मयाम नन्दप्रमाकारपित्वापस्मै लक्ष्मीमदान्दः सदहमदुरितं मयम्
ग्यः पयोधिः॥ इदं च परं वं चनापगुप्याविष्कारणं त्रपाविष्कारणं मपथा॥ दृष्ट्वैकेशव गोपरागहृतया किंचि
न्न दृष्टं मयात्रेह स्खलितास्मि नाथ पतितां किं नाम नालंबसे॥ एकस्त्वं विशमेषु खिन्नमनसां सर्वाबला
नां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरं॥ अत्र कस्यचित्पुरतो विषमपरिस्खलनममभिहितव
त्यास्तं कामयमानाया गोप्याः वचने विषमेषु पथिस्खलनपतनत्रायातामार्थ्येनात्मनेऽत्र इति प्रार्थयमा
नेनार्थेन गुप्तं विवक्षितमर्थांतरं सलेशं सस्वचनमित्यनेनाविष्कृतं॥ एवं नैषधादिषु चेतोनलं कामयते मद्
यं नान्यत्र कुत्रापि च साभिलाषमिति दमयंतीवाक्यादिकमप्युदाहार्यं॥ सर्वमिदं शब्दशक्तिमूलोदाहरणगुप्तार्था
विष्कृतं॥ अर्थशक्तिमूलगुप्तार्थाविष्करणं यथा॥ गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं वि
जनस्थयोर्हतजनः संभावयत्यन्यथा॥ इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पु
लकोत्करांचिततनुर्गोपीं हरिः पातु वः॥ अत्र गच्छाम्यच्युतेत्याद्यामंत्रणे नत्वपारमेतात्कालं स्थितेन ल
यमित्यर्थशक्तिलभ्यं वस्तु तोजनीपयादेनाविष्कृतं॥ सर्वमेतत्कविबद्धवक्तृगुप्ताविष्करणं॥ कविगुप्ताविष्करणं यथा राम॰ ५५

यामस्त्वं सखि पितेत्यपायास्तमस्यां तत्वत्कथापोषितां दारादेवविवर्जिताः सुरभय स्वगांधवत्पादपः॥ कोपंतगिरि
मुंच मय्यवनते दृष्टे प्रसीदीषुनासत्यं त्वद्विरहाद्भवंति दयिते सर्वा ममांधा दिशः॥ तत्र तावदीर्ष्याकलुषितदयि
ताप्रसादनव्यापारोयमिति प्रतीयते॥ दयितेगात्रेस्पर्शं क्षिप्रत्वाक्रोशो विषयक्षितार्थः॥ दृष्टेडत्यस्यपदस्योच्चारणो
न संबुद्धिरूपतावगम्यविकृतं॥ कविनिबद्धवक्तृगुप्तं परवंचनार्थं यत्कविगुप्तं स्वयोपि प्रकविगुप्तं स्वयोपि
प्रकटनार्थमिति भेदः॥ पुनि... पतानि संख्यानं क्षिपयाम भंगत्यये॥ त्वामालिखंतादृशान्यं धन्तः यौष्यं करे लिख
त॥ अत्र पुष्पचापलेखनक्षिपयामन्त्रयोमयालिखितमिति भ्रांत्युत्पादनेन स्वानुरागरूपमर्मप्रकाशनाय
परवंचनं कृतं॥ यथा वा॥ दंपत्योर्निशिजल्पतोर्गृहशुकेनाकर्णितं यच्च तत्प्रातर्गुरुसंनिधौ निगदितस्या
तिमात्रं वधूः॥ कर्णालंकृतपद्मरागशकलं विन्यस्य चंचुपुटे व्रीडार्ता विदधाति दाडि
मफलव्याजेन वाग्बंधनं॥ अत्र चकम्पुवाप्यमद्भूतापातनस्तेन स्वकीयरहस्यनिर्वचनमप्युदाहृतं॥
व्याजोक्त्यावाकारगोपनं पुनः क्रोतदन्यगोपनमिति भेदः॥ यहाव्याकान्हाबुद्धो नेमा गोपनमिहत्यक्त्वैपपात दि
ति भेदः॥ एवं चापांतमालीवाहारं प्रतीत्यामिति श्लोके पि युक्तिरव॥ लो... प्रवादास्तु। कृतिलो को निरिति

मरायतैा सह स्व कतिचिन्मासान्मीलयित्वा विलोचने॥ अत्र लोचने मीलयित्वेति लोकप्रवादानुकृतिः॥ गामदीपे
वरदाङ्गस्तवे॥ नामैव ते वरद वांछितदातृभावं व्याख्याति तेन वह सेवरदानमुद्रां॥ विश्वप्रसिद्धतरविप्रकु
लप्रसूतेर्यत्नोपवीतवहनं नहि न खलु येष्टं॥ अत्र त्रीन्राईं लोकप्रवादानुकारः॥ छेकोक्तिर्यत्र लोकोक्तेः
स्यादर्थांतरगर्भिता॥ भुजंग एव जानीते भुजंगचरणां सखे॥ वोन चित्तस्य चिह्नानां तत्पदस्य समीपस्थं नि
दृश्यायमेव तत्स्पष्टानांते ज्ञातीत्युक्तवतो यमहेः पादानहिरेव जानातीति लोकप्रवादानुकारः॥ अत्र स चाप्यंच
लोकविदितो धनार्जनादिव्यापारे सह चारि इति मरणानि वित्तविषयतया लोकोक्त्यनुवादस्य प्रयोजनेऽपि
तेरहस्योपि अनंगव्यापारे तत्सापेसस च र इति मर्मोद्घाटनमिति तेन गर्भीकृतं॥ यथा वा॥ मल्लयमल्लतान्धा
तापातावि कांतसिम ल्लिकाम दिमिलन्भ रो भग्नो ग्रामे स्वमनुसह सपादि॥ वनेपि तुंनंति लेप एव निर्जने प्र
भवति संध्ये गवां किं न छिन्नेस एव धनेपः॥ अत्र धनलिप्सया प्रोषितांगना सखी वचने पे एव गवां वाति
वर्त्तने प्रभवति गवां किं न छिन्नं स एव वक्षनेपः॥ अत्र धनलिप्सया प्रोषितांगना सखीवचने प एव गवां
निवर्त्तने प्रभवति स एव धनेऽत्र पदस्यां ध्वजाति लोकवादानुकारः॥ अत्रातिसौदर्यं शालिनीमामपहाय राम०

धनलिप्सया प्रस्थितो रत्नानभिज्ञ इति गोढ़ो पएव तस्य निवर्त्तकस्तु धनस्य ज्ञेताय नेनाकृष्टस्य तद्दिग्गवीकरणेन या
त्याकर्षकत्वादित्यर्थांतरमपि गर्भीकृतं॥ वक्रोक्तिः श्लेषकाकुभ्यां परार्थत्वप्रकल्पनं॥ मुंच मानं दिनं प्राप्तं नेह
नंदीहरंतिको॥ अत्र मानं मुंच प्रभाता रात्रिरित्य प्राये केनोक्तो पावाचिनं दिनं प्राप्तं मामुंच इत्यर्थांतरं श्लेषेणाप
रिकल्पितं॥ यथा वा॥ अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता॥ त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्
॥ इदं सविकृतश्लेषवक्रोक्तेरुदाहरणां॥ विकृतश्लेषवक्रोक्तिर्यथा॥ भविभविशारं मोह निद्रशावदन ग्लानिर
सुनासत्तरामस्याता नयुधिपुरतो लक्ष्मणास सखे॥ इयं यास्य तुच्छेर्वितपदमसुनावानरत्वमल्पचिपि देवराक्षस
परविलोपे पदपुनः॥ सर्वं भिदं शब्दश्लेषमूलाया वक्रोक्तेरुदाहरणां॥ अर्थश्लेषमूला यथा॥ भिक्षार्थी क्व
प्रयातः सुतनुः सुतनुबलिमखे तांडवं क्वाद्य भद्रे मन्ये वृंदावनांते क्वनु समृगशिशुर्नैव जाने वराहं॥ बाले कच्चि
न्न दृष्टो जरठवृषपतिर्गोप एवास्य वेत्ता लीलासंलाप इत्थं जलनिधिहिमवत्कन्ययोस्त्रायतां वः॥ काका यथा
॥ असमालोच्य कोपस्ते नोचितोयमितीरितान्नैवोचितोयमितित्तताया मासमालपाल॥ अत्र नैवोचित इति का
काख्यविकारेणा गच्चिन एवेत्यर्थांतरकल्पनं॥ स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं॥ कुरंगैरुत्तर

कुवलयानंद
५८ गास्ते सा सूकरौ रद्धौ क्षितिं॥ यथा वा॥ तौ संमुखं प्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ॥ पा
र्श्वोपसर्पणमभावविभिन्नदृष्टी कान्तावुभौ मुहुरुपासरतां सलज्जौ॥ भाविकं भूतभाव्यर्थसाक्षात्कारस्य व
र्णनं॥ अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः॥ स्थानमीषरावोऽम्बावनपरमिदं॥ यथा वा॥ अद्यापि तिष्
ठति दृशोरिदमुत्तरीयं धर्तुं पुनस्तननयात्यतितप्रवृत्तो वाचं निषम्य न पनेनय नं ममेति किंचित्तदायदकरो
स्मितमायताक्षी॥ इत्यादौ तमृद्धिसहितं श्लाघ्यं चान्योपलक्षणं॥ सा नौपस्याभव घुद्धं तद्वर्णं किरीटिनो॥ इदं प्रा
यचरितस्यांगत्वेनोदाहरणं॥ स्व्युदाहरणं यथा॥ रत्नस्तंभेषु संक्रांतप्रतिबिंबशतैर्वृतः॥ ज्ञातो लंकेश्वरः कृ
च्छ्रादांजनेयेन तत्त्वतः॥ अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनं॥ अर्थं दातरि राजेन्द्र याचकाः कल्पशाखिनः
॥ इदमौदार्यात्युक्तिः॥ शौर्यात्युक्तिर्यथा॥ राजन्सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः॥ त्वद्वैरिराज
वनिताबाष्पपूरेण पूरिताः॥ संपदत्युक्तौदात्तालंकारः॥ शौर्यात्युक्तावत्युक्त्यलंकारभेदं इति भेदमाहुः॥
अनयोरेव घागिस्तनयोः समताशुयोः अवकाशो न पर्याप्तस्तव बाहुलतान्तरे॥ अल्पं निर्मितमाका
शमनालोच्यैव वेधसा॥ इदमेवं विधं भाविभवत्वासननमंडलमित्यसदुक्तिस्तारतम्येनातिप्राप्तयुक्त्योर्भेदः॥ राम० ५८

॥ निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं॥ ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्॥ यथा वा॥ पुरा कवीनां
गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा॥ अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव॥ प्र
तिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनं॥ न द्यूतमेतत्कितवक्रीडनं निशितैः शरैः॥ निर्ज्ञातो निषेधः स्वतोऽनुपयु
क्तत्वादर्थांतरं गर्भीकरोतीति तेन चारुताचिन्नोयं प्रतिषेधो नामालंकारः॥ उदाहरणे युद्धरंगे प्रत्यवतिष्ठमानं य
वृत्तिकं प्रति विदग्धवचनं तत्र युद्धस्य चद्यूतत्वाभावो निर्ज्ञात एव वक्त्रा निर्मानस्तत्रैव तद्वत्प्राङ्गणं प्रत्युदु
त्पत्तिगत होस्तीत्युपहासं गर्भीकरोति कितवत्वेनाविष्कृतं॥ यथा वा॥ न विषेण न शस्त्रेणाग्निना न च
मृत्युना॥ अप्रतीकाररम्याभिः स्त्रीभिरेव स्त्रियः कृताः॥ अत्र स्त्रीणां विषादिनिर्मितत्वाभावः प्रसिद्ध एव वक्त्रोऽन्ये
मानस्तासां विषाद्यतिशायित्वोपमित्यपमर्थं व्यक्तीकरोति॥ सचाप्रतीकाररम्या इति ज्ञातीकारेणोपि विद्य
क्षिप्यतासां विशेषं दर्शयता विशेषणेनाविष्कृतः॥ सिद्धस्यैव विधानं यत्तदाहुर्विध्यलंकृतिं॥ पंचमोदंचनेका
ले कोकिलः कोकिलो भवेत्॥ निर्ज्ञातविधानमनुपयुक्तिबाधितेसदर्थांतरगर्भीकरणेन चारुतरमिति तं विधिना
मानमलंकारमाहुः॥ उदाहरणे कोकिलस्य कोकिलत्वविधानमनुपयुक्तं सदतिमधुरपंचमध्वनिशालितयास

कालंजनहृदयंगमीकरोतीत्युपमेयं वचनेदृति कालविशेषणोनाविषयः यथावा॥ तंतारेहृत्सद्विशिरामतत्त्वप्रशिक्षोर्दि
जस्यजीवातवे विसृष्टदृष्टमुनौ कृपाकृतां॥ रामस्य गात्रमसि निर्भरगर्भखिन्नसीताप्रवासनपटोः करुणा कुत
स्ते॥ अत्र रामस्य स्वहस्तप्रतिरामगात्रमसीतिवचनमयुक्तं॥ रामस्येत्यनेन स्वस्यात्यंतनिष्ठुरत्वं गम्यो करो
ति॥ ध्वनिभेदेत्यादिविशेषणो नाविष्कृतं॥ यद्यप्यनयोर्विधिनिषेधमोरुदाहरणेषु व्यंग्यान्यार्थांतरसंक्र
मितिवाच्यरूपाणि तथापि न ध्वनिभावास्य हानि॥ एवो नैव व्यंग्यविशेषणं॥ विष्कृतं व्यंग्याविष्करणे चालं
कारत्वमेवेतिप्राक्प्रस्तुतांकुरप्रकरणो व्यवस्थापितत्वात्॥ एवं बाधितौ विधिप्रतिषेधौ आक्षेपभेदत्वे
नोक्तौ॥ इहह्यप्रसिद्धौ विधिप्रसिद्धौतत्वातिदं द्विनालंकारत्वेन वर्णितावितिभेदः॥ हेतोर्हेतुमता सा
र्द्धं वर्णनं हेतुरुच्यते॥ असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां॥ यथावा॥ एषतेविद्रुमच्छायोम
रुमार्गइवाधरः॥ कस्य नानन्तुतेतत्त्विपिपासाकुलितं मनः॥ मानिनेद्धतिवारयत्युपशमे क्ष्मामालिंग
न्नाहिपास्वानत्रेयपरिवस्यातिष्ठतिकौ व्याप्य धैर्यं गते॥ उल्लेखामनुवन्यतापफलमिप्यत्राप्रजनेना
मपात्ययक्षीनपरामस एवचरणोस्य कंन संमन्यते॥ इत्यादि युदाहरणे॥ हेतुहेतुमतोरैक्यं हेतुं केचित्प्रच राम॰

स्यते॥ लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः॥ अत्र कार्यावश्यंभावं तच्छैघ्र्यादिप्रत्यायनार्थं कार्यं
कारणाभेदव्यपदेशः॥ यथावा॥ आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान् विश्वासो नयनो
त्सवो मृगदृशां कीर्तेः कीर्तेः प्रकाशोपरः॥ आनंदः कलिताकृतिः सुमनसां वीरश्रियो जीवितं धर्मस्यैव
निकेतनं विजयते वीरः कलिंगेश्वरः॥ अत्र दानमहोत्सवायुष्करत्वादिना व्यवसिते तादृशपुष्टा
दित्यपदेशः॥ इत्यंशतमलंकारा लक्षयित्वा निदर्शिताः॥ प्राचामाधुनिकानांच मतान्यालोच्य सर्वत
चत्वारो रसवत्प्रेयऊर्जस्विच्च समाहितं॥ भावस्य चोदयः संधिः शबलत्वमिति त्रयः॥ अथ प्रमाणालंका
राः प्रत्यक्षप्रमुखाश्च मानत्॥ एवं पंचदशान्यांश्चालंकारान् विदुर्बुधाः॥ तत्र विभावानुभावव्यभिचारिव्यं
जितो रतिहासशोकादिश्चित्तवृत्तिविशेषो रसः॥ स च यत्र परस्यांगं भवति तत्र रसवदलंकारः॥
विभावानुभावाभ्यामभिव्यंजितो निर्वेदादिर्व्यभिचारिभावः देवतागुरुनृपहितकलत्राद्यविभि
द्युमाना रतिश्च भावः॥ स यत्रांगं स प्रेयोलंकारः॥ अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभास
श्चोच्यते स यत्र परस्यांगं तत्रोर्जस्वि॥ भावस्य प्रशाम्यदवस्था भावशांतिः तस्याः परांगत्वे समाहितं॥ भा

कुवलयानंदः
५६

वस्योद्भावस्याभावोदयः॥ द्वयोर्विरुद्धयोर्भावयोः परस्परस्पर्द्धा भावसंधिः॥ बहूनां भावानां पूर्वपूर्वोपमर्देनोत्प
त्तिर्भावशबलता॥ तेषामितरांगत्वे भावोदयादयस्त्रयोऽलंकाराः॥ तत्र रसवदुदाहरणं॥ मुनिर्जयति योगींद्रो
महात्मा कुंभसंभवः॥ येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ॥ अत्र मुनिविषयरतिरूपस्य भावस्या
द्भुतरसोंगं॥ यथा वा॥ अयं स रसनोत्कर्षी पीनस्तनविमर्दनः॥ नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥
अत्र करुणस्य शृंगारो रंग॥ प्रेयोलंकार एव भावालंकार इत्युच्यते॥ स यथा॥ कदा वाराणस्याममरतटिनीरो
धसि वसन् वसानः कौपीनं शिरसि निदधानोंजलिपुटं॥ अयि गौरीनाथ त्रिपुरहर शंभो त्रिनयन प्रसीदेति क्रो
शान्तिमिषमिव नेष्यामि दिवसान्॥ अत्र शांतरसस्य कदेति पदसूचितचिंताख्यो व्यभिचारिभावोंगं॥ यथा
॥वा॥ अत्युच्चाः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि न क्लांतासि तुभ्यं नमः॥ आश्चर्ये
णा मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः॥ अत्र प्रभुविष
यरतिभावस्य वसुमतीविषयरतिभावोंगं॥ ऊर्जस्वि यथा॥ त्वत्प्रत्यर्थिवसुंधरेशतरुणीः संत्रासतः सत्वरं
यांतीर्वीक्ष्य वलितदृग्रभसं याताः किराता वने॥ तिष्ठंति स्तिमिताः प्ररूढपुलकास्ते विस्मृतोपक्रमास्तासामुद्दाम॰
५६

चारुलैस्तैर्नेरतितरां लोलैरपांगैरपि॥ अत्र प्रभुविषयरतिभावस्य शृंगाररसाभासोंगं॥ यथा वा॥ त्वयि लोचन
गोचरं गते सफलं जन्म नृसिंह भूपते॥ अजनिष्ट ममेति सादरं युवतिविज्ञापपतिर्द्विषां गणः॥ अत्र कवे
प्रभुविषयस्य रतिभावस्य तद्विषयद्विषच्छृंगाररतिरूपो भावाभासोंगं॥ समाहितं यथा॥ पश्यामः किमयं प्र
पद्यत इति स्थैर्यं मयालंबितं किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः॥ इत्यन्योन्यविलक्षद
ष्टिचतुरे तस्मिन्नवस्थांतरे सव्याजं हसितं मया धृतिहरो मुक्तस्तु बाष्पस्तया॥ अत्र शृंगारस्य कोपशां
तिरंगं॥ भावोदयो यथा॥ तदवधि विप्रस्य दृपा॥ ल्तुरोधिमे दिने निनीथामिसव द्विलोकिनी॥ अदर्शि पादेन विल
त्वपस्त्रिणा तवैव रूपे तास मनः समत्रियः॥ अत्र नलं प्रति दमयंत्या औत्सुक्यरूपस्य भावस्योदयः शृंगारस्य
गं॥ भावसंधिर्यथा॥ एकाभ्युत्सुकमापुषे बुधिरिव डाव्यक्तपूर्वावली डीतभंगलपालिके वपुलकैर
न्याच्च पोलस्थली॥ नेत्रानाक्षी क्षरामात्र भावविरहक्लेशासहां पश्यद्रागोगाकर्णायत स्फुरवीरभवतः यौ
डाहवाडवेव रा॥ अत्र रमणी प्रेमरसोत्कायोत्सुकसंविप्रभुविषयभावस्यांगं॥ भावशबलत्वं यथा॥ कार्य
शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नश्रुतमहो कोपेपि कांतं मुखं॥ किं वेक्ष्यंत्यक

कुवलयानंदः पकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति॥ अत्र वितर्कौत्सु-
६० क्यमतिस्मरणदैन्यधृतिचिंतानां शबलता विप्रलंभशृंगारस्यांगं॥ प्रमाणालंकारे प्रत्यक्षं यथा॥ कांतका-
न्तवदनप्रतिबिंबे भग्नबालसहकारसुगंधौ॥ स्वादुनि प्रणदितालिनि शीते निर्ववार मधुनींद्रियवर्गः॥
यथा वा॥ किं तावत्सरसि सरोजमेतदारादाहोस्विन्मुखमवभासते युवत्याः॥ संशय्य क्षणमिति निश्चिका-
य कश्चिद्बिब्बोकैर्बकसहवासिनां परोक्षैः॥ पूर्वं प्रत्यक्षमात्रम् अत्र तु विशेषदर्शनजन्यसंशयोत्तरप्र-
त्यक्षमिति भेदः॥ अनुमानं यथा॥ यथा रंध्रं व्योम्नश्चलजलदधूमः स्थगयति स्फुलिंगानां रूपं दधति
यथा च कीटमणयः॥ यथा विद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्तथा मन्ये लग्नः पथिकतरुखंडे स्मर-
दवः॥ यथा वा॥ यत्रैता लहरीचलाचलदृशो व्यापारयंति भ्रुवौ यत्तत्रैव पतंति संततममी मर्मस्पृशो
मार्गणाः॥ तच्चक्रीकृतचापपुंखितशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं सदासां स्म-
रः॥ पूर्वं रूपकसंकीर्णमिदमतिशयोक्तिसंकीर्णमिति भेदः॥ स्पृष्टानुमानं तपनिलापमानैर्विहगैर्निपीतैः॥
द्विष्टपंकजैः॥ विकसत्या च मालत्या गतोस्तं ज्ञायते रविः॥ यथा वा यथा॥ सौमित्रे ननु सेव्यतां तरुतलं चंडांशुरु- राम० ६०

ज्जृंभते चंडांशोर्निशि का कथा रघुपते चंद्रोयमुन्मीलति॥ वत्सैतद्विदितं कथं नु भवता धत्ते कुरंगं यतः क्वा-
सि प्रेयसि हा कुरंगनयने चंद्रानने जानकि॥ उपमानं यथा॥ तां रोहिणीं विजानीहि ज्योतिषामत्र मंडले॥ यस्त-
न्वि तारकान्यासः शकटाकारमाश्रितः॥ अत्र मन्मथमिवातिसुंदरं दानवारिमिव दिव्यतेजसं॥ शैलरा-
जमिव धैर्यशालिनं वेद्मि वेंकटपतिं महीपतिम्॥ पूर्वोदाहरणे उपमानमलंभूतमतिदेशवाक्यस्थि-
तं॥ अत्रातिदेशवाक्यार्थस्ताद्रूप्यप्रत्यक्षरूपमुपमानं फलेन सह दर्शितमिति विशेषः॥ शब्दप्रमाणं
यथा॥ विवक्षितां दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितं॥ यमामनंत्यात्मभुवोपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति॥ अत्र शिवः परमेष्ठिनोपि कारणमित्यत्र श्रुतिरूपं शब्दप्रमाण-
मुपन्यस्तं॥ एवं श्रुतिपुराणागमलौकिकवाक्यरूपाण्यपि शब्दप्रमाणान्युदाहरणानि॥ बलानु-
तयापानि संसृतान्यकृतानि वः॥ सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत्॥ पूर्वं श्रुतिरभिमतार्थे
प्रमाणत्वेनोपन्यस्ता अत्र स्मृतिरनभिमतार्थे तद्दूषणाय परेण प्रमाणतयेति भेदः॥ आचारात्मतुष्टो
र्विमीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमापकतया प्रमाणएवांतर्भावः॥ तत्राचारप्रमाणं यथा॥ म

वृ॰ कुवलयानंद ६१

हारजनाचारयदेदृशीसनामतामाद्दती नसाधवः॥ अतोमिथ्यांहनतमहत्स्तहेपुनर्जनः किलाचारमुख्य
विग्रापयति॥ असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्यामभिलाषिमेमनः॥ सतांहिसंदेहपदेषुवस्तुषुप्र
माणमंतःकरणप्रवृत्तयः॥ अत्रदुष्यंतेनात्मनस्तष्याशकुंतलापरिग्रहसाधर्म्यस्वमनःप्रवृत्त्यमतप्रमा
णीपते॥ एवंश्रुतिलिंगादिकमपिमीमांसकोक्तप्रमाणंसंदिहीदाहर्तव्या॥ तत्रश्रुतिर्यथा॥ विहि
ताम्नैववरहोनाधत्तनेवरमुद्रिकां॥ नहिश्रुप्रसिद्धार्थेलिंगमाद्रियतेबुधः॥ अत्रकरिगिरास्वर
सवरदृश्यमिधानश्रुत्यासर्वोभिलषितत्वात्तत्वंसमर्थितं॥ लिंगंयथा॥ विदितेवोपथ्यास्वाध्यायनमे
काश्चित्प्रवृत्तयः॥ नतुमन्त्रीभिरष्टाभिरित्यमतोस्मिसूचितः॥ अत्रशिवस्यश्रुतिप्रसिद्धसर्वो
पकारकपयस्विनीपरिग्रहलिंगेनतत्परार्थप्रवृत्तीनांलोकानुग्रहैकप्रयोजनत्वंसमर्थितं॥ लिंगस्य
कमृतचेदानुमापकतयावैदिकशब्दप्रमाणएवांतर्भावः॥ एवंलौकिकलिंगानामपिलौकिक
शब्दोन्नायकतयालौकिकशब्दःकप्रमाणएवांतर्भावः॥ अतोललनयाविपक्षदिग्रुपन्यासेविधत्तोशि
रस्तद्ज्ञातपरीक्षणोद्धतमनस्कारोविलक्षणः॥ ईषन्नामकपोलकांतिनिमुखेदृष्यानतःपारपोर रामः ६१

स्पष्टोऽरसंनिस्रावविधिपिर्ह्मांनकालोचितइत्यादिचेष्टारूपंप्रमाणंतरंनाशंकनीयं॥ कंचित्सुन्दर
माणंकल्पनयाचमत्कारः॥ यथा॥ किमसुभिर्ग्लपितैर्जडमन्यसेमयिनिमज्जतुभीमसुतामनः॥ मम
किलश्रुतिमाहतदर्थिकांनलमुखेंदुपरांविबुधःस्मरः॥ अत्रान्वियमाणानांमनश्चंद्रविधाती
त्येतेदर्थिकायाःश्रुतेर्नलमुखचंद्रविषयत्वेन॥ नलिखितयाव्याख्यातस्मरवाक्यंप्रमाणतयोपन्यस्तं
॥ अर्थापत्तिर्यथा॥ निर्णीतंपरावमस्तीतिमध्यंतवनितंबिनि॥ अन्यथानोपपद्येतपयोधरभरस्थितिः॥
पाद्यावा॥ अयंकवलीयान्यादिहेतरागमाद्यस्यत्ताज्ञलधिंनजाह्नवी॥ गंगौघनिर्भर्त्सितशंभुकंठराम
वर्तामतोःकथमन्यथास्याना॥ अनुपलब्धिर्यथा॥ स्फुरमसदृशलमंतचिनिश्चिन्वतीतेदृत्युपलभ
मानास्तर्कयंतोपिलोकाः॥ कुचगिरिवरयुग्मंपद्दिनाधारमात्मेयदिहमकरकेतोरिंद्रजालंप्रतीमः॥
संभवोयथा॥ अभूतपूर्वंममभाविकिंवासर्वंसहेमेसहजंहिदुःखं॥ किंतुत्वदग्रेशरणागतानांपराभ
वोनाथनतेनुरूपः॥ यथावा॥ येनामकेचिदिहनःप्रथयंत्यवज्ञांजानंतितेकिमपितान्प्रतिनैषयत्न
॥ उत्पत्स्यतेस्तिममकोपिसमानधर्माकालोह्ययंनिरवधिर्विपुलाचपृथ्वी॥ यथावा॥ भ्रातःपा

कुवलयानंदे
६२

थकुतो मन्ननगरनो वार्त्तां न वा वर्त्तीते वार्तं ब्रूहि पुवाय यो रससमपेत्य त्वां प्रियां जीवति ॥ सत्यं जीवति त्वीव
तीति कथिता वार्त्ता मयापि श्रुता विस्तीर्णा स्थिवीजनोपि विविधः किं किं न संभाव्यते ॥ अत्राद्योदाहर
णे अमृतपूर्वं मम मा विकिं बोति संभवप्रमाणसिद्धोर्थो दर्शितः ॥ द्वितीयोदाहरणे संभवोपपादकालां
नत्यादिकमपि दर्शितं ॥ तृतीयोदाहरणे तु संभवोपि कंये न इति भेदः ॥ ऐतिह्यं यथा ॥ कल्याणी वत गा
थेयं लौकिकी प्रतिभाति मे ॥ एति जीवंतमानंदो नरं वर्षशतादपि ॥ अत्र लौकिकी गाथेयमित्यनिर्दिष्टप्र
वक्तृकप्रवादपारंपर्यरूपता दर्शिता ॥ अथैतेषामलंकाराणां यथासंभवं कचिन्मेलने लौकिकालंका
राणां मेलन इव चारुत्वातिशयोपलंभान्नरसिंहन्यायेन पृथगलंकारावस्थितौ तन्निर्णयः क्रिय
ते ॥ तत्र तिलतंडुलन्यायेन स्फुटावगम्यभेदालंकारमेलने संसृष्टिः ॥ नीरक्षीरन्यायेनास्फुटभेदालंकार
मेलने संकरः ॥ स चांगांगिभावेन समप्राधान्येन संदेहेन एकवाचकानुप्रवेशेन चतुर्विधः ॥ एवं न
सिहाकाराः पंचालंकाराः ॥ तत्र संसृष्टिर्यथा ॥ कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया
॥ चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया ॥ अत्र शब्दालंकारानुप्रासयमक

रामः
६२

योः संसृष्टिः ॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभः ॥ असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ अत्रोत्प्रेक्षोपमा
श्चेत्यर्थालंकाराणां संसृष्टिः ॥ आनंदमंथरपुरंदरमुक्तमाल्यं मौलौ हठेन निहितं महिषासुरस्य ॥ पादा
म्बुजं भवतु मे विजयाय मंजुमंजीरशिंजितमनोहरमंबिकायाः ॥ अत्र शब्दार्थालंकारयोरनुप्रासोपमयोः
संसृष्टिः ॥ अंगांगिभावसंकरो यथा ॥ तलेखवेयंत महीरुहाणां छायास्तदेमा रुतकंपितानां ॥ शशांकसिं
हेन तमोगजानां लूनानां कृत्तीनामिव गात्रखंडाः ॥ अत्र शशांकसिंहेनेति तमोगजानामिति च रूपकं
पद्वयं तत्र शशांक एव सिंहस्तमांसीव गजा इति मयूरव्यंसकादिसमासाश्रयेण रूपकं वा ॥ शशांकः
सिंह इव तमांसि गजा इवेत्युपमितिसमासाश्रयेणोपमापि वक्तुं शक्या ॥ न चापि लूनाकृत्तीनामिति
विशेषणानुगुण्याद्रूपकसिद्धिः ॥ तस्य हि विशेषणस्य प्राधान्येन सहान्वयेन भाव्यं न तु गुणेन गुणानां
च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायादुपमितिसमासाश्रयणे तस्य पूर्वपदार्थप्राधान्यात्त्वाच्छ
शांकस्तमसां च प्राधान्यं भवेत् ॥ तत्र न विशेषणामुख्यार्थान्वयस्वारस्यमस्ति स्वरूपनाशरूपोपक्र
रितादृत्तिलवनकर्त्तनान्वयसंभवे विमुख्यार्थान्वये स्वारस्यमेवादरणीयं ॥ स्वरूपसनाशकत्वोदीवर

कुवलयानंदः
६३

राप्रवर्त्तकपालस्य राज्ञामलातिशयो न तावद्रूपकसिद्धिः॥ तत्र रूपकमुत्प्रेक्षा वा प्रसंगं॥ तदुत्थापकत्वात्॥
रूपकाभावे हि शयालनगात्रखंडाद्वा चेपं तेत्येता वदुक्तावुभमेव सिध्येत्॥ वेपनादिसाधर्म्यात्
नच्छायानां सद्यः कृतेगात्रखंडतादात्म्यसंभावनारूपोत्प्रेक्षा॥ न तु शशांकेनलसालातीतां तमसांग
त्रखंडाद्वावेपं तेत्येतौ वक्ता च पि सिद्धमुत्प्रेक्षा॥ तादात्म्यसंभावनोपयुक्तोत्तना कृतिसरूपाधि
कविशेषणोपादानात्॥ सत्यं॥ तयोर्वपि क्ता कृतिलवनादिधर्मरूपकार्यसमारोपनिमित्ताशयां
कातमसोहंतव्याचेतनवक्तांतसमारोपरूपासमोक्तिरपेक्षणीया एवमुक्तौ रूपकमिति विशेषः॥ एव
मत्रातिशयोक्तिरूपकोत्प्रेक्षाणामंगांगिभावेन संकरः समप्रधान्यसंकरो पृथ्वा॥ अवतु नः सवितुस्तु
रगावली समतिलंघितनुंगपयोधराः॥ स्फुरितमध्यगतारुणनायकामरकतैकलतेच नभःश्रियः॥ अत्र
त्रयपयोधरादिपद्धश्लेषमूलातिशयोक्त्यंगभूतयोत्थाप्यमानैव सवितुस्तुरगावल्या मरकतैकावली
तादात्म्योत्प्रेक्षा नभोलक्ष्म्यां नायिकाव्यवहारसमारोपरूपसमासोक्तिगर्भे वोत्थाप्यते॥ पयोधरश्लेष
स्योपकारकत्वात्॥ तत्र चोत्प्रेक्षासमासोक्त्योरेककालः परस्परापेक्षया चारुत्वसमर्पणेन ह्युभयोस्तुल्य रम०
६३

तिविनिगमनाविरहात् समप्राधान्यम्॥ यथा॥ अंगुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः॥ कु
ड्मलीकृतसरोजलोचनं चुंबतीव रजनीमुखं शशी॥ अत्रांगुलीभिरिवेति वाक्योक्तोपमया तत्रापय
तन्मुख्यकुड्मलीकरणालिंगनानुगुणपाचोपमितसमासाश्रयणेन लययापसरोजलोचनमिति सम
सोक्तोपमापाग भूतयोत्थाप्यमानैव शशांकरजनिशाकमुखचुंबनोत्प्रेक्षा निशाशशिनोर्दंपतीव्यवहारस
मासिपरूपसमासोक्तिगर्भैवोत्थाप्यते॥ उपमयोरभयपक्षेस्यापकत्वाविशेषात्॥ समासोक्तिगर्भतां विना
चुंबनोत्प्रेक्षायानिरालंबनात्वात्॥ तत्रोत्प्रेक्षासमासोक्त्योरेककालयोः समप्राधान्यं॥ पच्यन्त्र्यो
माभ्यांशशिनिशागताभ्यां धर्मौ समर्थ्येते॥ न तु शशिनायकयोर्निशानायकयोश्च साधारणौ धर्मौ साधा
रणधर्मसमर्थनोत्प्रेक्षासमासोक्त्योरपेक्षितं उत्प्रेक्षायां प्रकृताप्रकृतसाधारणगुणक्रियारूपनिमि
त्तसापेक्षत्वात् समासोक्तेर्विशेषणसाम्यमूलकत्वान्नियामकोक्तोपमायामिवकारस्य मणिवि
रे वेत्यन्वयांतरमभ्युपगम्याच मभेदलक्षणेऽस्य प्रकृताप्रकृतयोरैकविषयस्यार्थद्वयस्य समासोक्तौ
पमायां सरोजसदृशं लोचनमिति समासांतरमभ्युपगम्यस्य समासभेदलक्षणार्थद्वयस्याभेदाध्यवसा

कुवलयानं पेनसाधारण्यसंपाद्यतयोत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या॥ पद्मादिदृष्टप्रकृतकोटिगतानां मरीचितिमिरसरोजानां त्र्य
६५ प्रकृतकोटिगतानामंगुलीकेशसंचयपल्लवानां च तनुत्वदीर्घत्वारुणत्वनीलत्वनीरंध्रत्वकांतिमत्त्वादिना सदृशानां
प्रातिस्विकरूपेणाभेदस्य वस्तुगत्या साद्दश्यप्रयोजकरूपेणाभेदोप्यस्ति स चात्र विवक्षित एव॥ भेदाभेदोभय
प्रधानोपमेत्यालंकारिकसिद्धांतात्॥ तत्र च प्रयोजकांशानिष्कर्षेणाभेदगर्भतांशोपजीवनेन साधार
ण्यसंपाद्यप्रधानमुत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या॥ नहि प्रकाशशीतापनयनयनशक्तिमतः सौरतेजसः
शीतापनयनशक्तिमात्रेणाशीत्यलूपयोगितानदृष्टा॥ एवमनभ्युपगमे च कथं श्लोपमं सार्पिजलंवहारः
सक्तूत्पांशुगोहरिद्वंदनेच॥ आभातिबालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजइत्याद्युपमायांनिर्वि
हेत॥ नह्यत्राद्रिराजयोःप्रयोरूपमानोपमेययोरनुगतः साधारणो धर्मो निर्दिष्टः॥ एकत्र बालातपनिर्झरा
वन्यत्र हरिद्वंदनहाराविति धर्मभेदात न स्नानत्र बालातपहरिद्वंदनयोर्निर्झरहारयोश्च सदृशयोरभेदाध्यवसाय
नमेव गतिः॥ दिनप्राप्तितरंगाद्यैः समुद्रः पीनचंदनं॥ तत्तापकरैरिंदुलिप्तीवाद्गंगना॥ अत्रोत्प्रेक्ष
योः कालभेदेपि समप्राधान्यं॥ अन्योन्यानिरपेक्षबाधाद्वयोपात्तत्वात्तद्वादायेतिपेनचंदनरूपकमात्रोप एम०
६५

त्थापनेन पूर्वोत्प्रेक्षानपेक्षणात्॥ न चैवं लिंतीवपत्तमो गानीति दुस्त्रिवक्षाद्वयस्य संसृष्टिरेवोपमितिवाच्यं॥ लोकसि
द्धपेषणलेपनयोर्वापर्वक्षाधानुकारिणोत्प्रेक्षाद्वयवर्योवीर्यणा चाहतानिषयसमुन्मेषतः संसृष्टिवैषम्यात्॥ त
स्मादत्र शोदिवदेकपलसाधनयाः समप्राधान्यमिदमुत्प्रेक्षाद्वयमेवं समप्राधान्यसंकरेषु दाहृतः॥ संदेहसंक
रो यथा॥ शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा॥ इति समगुणयोगप्री
तयस्तत्र पौराः श्रवणकटुनृपाणामेकवाक्यं विवव्रुः॥ इयमिसर्वनाम्नापचजह्नुकत्वनीर्हुमतीविशिष्टं
येणानिर्दिष्टत्वेनतावैवप्रतिबिंबभावापन्नधर्मविशिष्टयोः सदृशयोरभ्यारोपरूपानिदर्शनाप्रतिन
सास्वरूपेणैव निर्दिष्टत्वेनप्रतीतेस्तो धर्मस्तु पूर्वं प्रस्तावात्समगुणयोगप्रीतयेइतिपौरविशेषणाच्चगम्यतेतत्र
प्रस्तुतेधर्मेणेतिदृष्टांतप्रतिबिंबमजाप्रस्तुतवृत्तांतारोपरूपंललितमित्यनध्यवसायात्संदेहः॥ विली
येंदुसास्यादमृतरसवापीपरिभवैकलेकस्तत्रपीपदवैदीवखने॥ ततः स्नानक्रीडाजनितजडभावैर
वयवैःकदाचिन्मुंचेयमदनशिखिपीडापरिभवे॥ एतावत्साधनकदापिनसंभवत्येवातस्तापशांतिर
पि गगनकुसुमकल्पेत्यर्थेकविसंरंभस्येनादुपात्तमिथ्यात्वसिद्ध्यर्थमिथ्यांतरकल्पनारूपमिथ्याध्य

वसतीति रीत्युभयथासंभवात्संदेहः ॥ एवं सति कंसस्फटिककुंभतस्थितिमेतीकृतेऽर्द्धलेश ॥ मौक्तिकं चेष्टन्तां
स्रुतीतत्प्रश्रेतो समंपयः ॥ इत्यादिष्वपि संभावनामिथ्याध्यवसितिसंदेहसंकरो द्रष्टव्यः ॥ मन्दमेनगरलं
चन्द्रलेव सति चेत्पूर्णा ॥ पक्षसंदेहगुरुत्वात्तद्गत्या किं प्रयोजनं ॥ अत्र महोरगवर्त्मनां तेन वर्त्तमाने
रहस्यखलवर्त्मनोऽपि प्रतीयते न किं वस्तुतस्तया भवतोरगवर्त्मनां त एव प्रस्तुतेऽप्रस्तुतः खलवर्त्मनां ते
स्तनःप्रतीयत इति समासोक्तिः ॥ अथवा प्रस्तुतखलवर्त्मनां तत्प्रत्यायनाया प्रस्तुतमहोरगवर्त्मनां तत्को
र्त्तनमप्रस्तुतप्रशंसा ॥ यद्वा ॥ वर्त्तमानमहोरगवर्त्मनां कीर्त्तनेन समीपस्थितखलमर्मोद्घाटनं चोपत
इत्युभयस्यापि प्रस्तुतत्वान्प्रस्तुतांकुरइति संदेहः ॥ एकवाचकानुप्रवेशसंकरस्तु शब्दार्थालंकारयो
रेवेति लपितवाक्यप्रकाशकाराद्ययाहारा ॥ स्पष्टोल्लसत्किरणकेसरसूर्यविंबविस्तीर्णकर्णिकम
थोदिवसारविंदं ॥ श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धान्धकारमधुपावलिसंचुकोच ॥ अत्रैव
पदानुप्रविष्टो रूपकानुप्रासौ ॥ पत्रैकस्मिन्श्लोके पदभेदेन शब्दार्थालंकारयोः स्थितिः तत्रतयोः सं
सृष्टिः ॥ इह तु संकर इति ॥ अलंकारसर्वस्वकारस्तु एकस्मिन्वाचकेऽनुप्रवेशो वाच्योपोल्लेख्या ताम्०

रथोत्सार्थमिकवाच्यप्रतियोगिकतया द्वाचकस्यैवेति मत्वार्थालंकारयोरेकवाचकानुप्रवेशसंकरमुदाज
हार ॥ सत्पुष्करद्योतितरंगशोभिन्यमंदमारब्धमृदंगवाद्ये ॥ उद्यानवापीपयसीव यस्यामेणीदृशो नाट्य
गृहे रमंते ॥ अत्र नाट्यगृहवापीपयसोः सत्पुष्करेत्यादिविशेषणशब्दसाम्यं श्लेषः ॥ अमंदमारब्धेत्या
दिविशेषणेऽर्थसाम्यमुपमा तदुभयमेकस्मिन्निवशब्देनुप्रविष्टमिति तदपि न मन्यामहे ॥ सत्पुष्करेत्या
विशेषणे श्लेषभित्तिकाभेदाध्यवसायरूपातिशयोक्तिमूलस्य धर्मसाम्यस्यैव तत्रैव शब्दप्रतिपाद्यतया
शब्दसाम्यस्य तत्प्रतिपाद्यत्वात् ॥ श्लेषभित्तिकाभेदाध्यवसायेन धर्मसाम्यलाभवर्णीकारे० अहोरा
गवतीसंवतीसंध्याउ हासि स्वयमंबरमित्यादिश्लिष्टविशेषसमासोक्त्युदाहरणे विशेषणशाम्य
भावेन समासोक्त्यभावप्रसंगात् ॥ शब्दसाम्यस्यैव शब्दप्रतिपाद्यत्वे पितस्तत्रोपमावाचकत्वस्यैव प्र
त्या श्लेषवाचकत्वाभावाच्च शब्दतोऽर्थतो वा कविसंमतसाम्यप्रतिपादने सर्वविषयेषूपमालंकारस्व
कारात् ॥ अन्यथा यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा ॥ तथैव सोमुदं धत्ते राजा प्रकृतिरंजनात्
इत्यत्राप्युपमा न स्यात् ॥ न ह्यत्रान्वर्थनामरूपशब्दसाम्यं विना किंचिदर्थसाम्यं कविविवक्षितमस्ति ॥

कुवलयानंदः

६६

तस्माद्यत्रैकस्मिन्नर्थे प्रतिपाद्यमानेऽलंकारद्वयलक्षणाद्द्वययोगादलंकारद्वयप्रतीतिः॥ तत्र तयोरलंकारयोर
कस्मिन्नर्थे प्रतिपाद्यमानेऽलंकारद्वयलक्षणाद्द्वययोगादलंकारद्वयप्रतीतिः॥ तत्र तयोरलंकारयोरेकवा
चकानुप्रवेशः॥ यथा॥ विसृष्करपरिरंभाद्राजानिषोढ्यस्य तौः शशिरिद्वषहूपक्षैरत्यैरालवालैस्तरूणां॥ वि
फलितजलसेकप्रक्रियागौरवेण व्यरचि स हतचिंतस्तत्र भीमवने॥ अत्र हि प्रतिपाद्यमानोऽर्थो
समृद्धिमद्वस्तुवर्णनमुदात्तमिति लक्षणानुसारादुदात्तालंकाररूपः॥ असंबंधे संबंधकथनमतिश
योक्तिरिति लक्षणादतिशयोक्तिरूपश्च॥ न च सर्वत्रोदात्तस्यासंबंधे संबंधवचनरूपत्वेन निर्णीतमिति न विव
क्तालंकारद्वयलक्षणासमावेशोऽस्तीति वाच्यं॥ दिव्यलोकगतसंपत्समृद्धिवर्णनादिष्वतिशयोक्तेर
स्पष्टस्योदात्तस्य शौर्यहरिश्चंद्रादिविषयवर्णनेषु शशानास्पृष्टायाअतिशयोक्तेश्च परस्परविविक्ततया
विश्रांतेः॥ तयोश्चेहार्थवशसंपन्नसमावेशयोर्नांगांगिभावः॥ एकेनापरस्यानुत्थापनात्॥ स्वातंत्र्य
पारतंत्र्यविशेषादर्शनाच्च॥ नापि समप्राधान्यसंकरः शब्दैरिह समृद्धिमद्वस्तु प्रतिपाद्यते तैरेव तस्यैव रू
नोऽसंबंधे संबंधरूपस्य प्रतिपाद्यमानतया प्रतिपादकशब्दव्यवस्थितमेवाभावात्॥ नापि संदेहसंकरो
क्वाप्येकालंकारकोट्यादन्यालंकारकोटिप्रतिक्षेपाभावात्॥ तस्मादिहोदात्तातिशयोक्त्योरेकवाचकानुप्र रामः

६६

वेशलक्षणः संकरः॥ क्वचित्संकराणामपि संकरो दृश्यते॥ यथा॥ मुक्ताः केलिविसूत्रहारगलिताः संमार्ज
नीभिर्हृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः॥ दूराद्दाडिमबीजशंकितधियः कर्षंति केली
शुकाः यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितं॥ अत्र तावद्विदुषां संपत्समृद्धिवर्णनमुदात्तालंका
रः॥ तन्मूलको बालांघ्रिलाक्षाहरणाद्रूपतद्गुणालंकारः॥ तत्र वक्ष्यमाणभ्रांतिमदुपपादकःपदार्थहे
तुकं काव्यलिंगालंकारश्चेति तयोरेकवाचकानुप्रवेशसंकरः॥ तन्मूलः शंकितधियपदरूपश्च भ्रांतिमद
लंकारः॥ ताभ्यां चोदात्तालंकारस्याहितानीत इति तयोश्च तस्य चांगांगिभावसंकरः॥ एवं विविदद्भुत
वैभवस्य हेतुमतो राज्ञो वितरणविलासस्य हेतोश्चाभेदकथनं हेत्वलंकारः स च राज्ञो वितरणविला
सस्य निरतिशयोत्कर्षाभिव्यक्तिपर्यवसायी एतावन्मात्रे कविसंरंभश्चेदुदात्तरूपोदात्तालंकारपरि
स्थितौ हेत्वलंकारे विश्रांतिः॥ वर्णनीयस्य राज्ञः कीर्तिसंपदतिप्रशंसनोत्तरतया निरतिशयैश्वर्यवि
तरणरूपाप्रस्तुतकार्यमुखेन तद्दीपसंपदुत्कर्षप्रशंसने कविसंरंभश्चेत्कार्यनिबंधनाप्रस्तुतप्रशं

कुवलयानंद
६९

सालंकारेविश्रांतिः॥कार्यस्यापिवर्णनीयत्वेनप्रस्तुतत्वाभिप्रायेतुप्रस्तुतांकुरेविश्रांतिः॥अत्रचविशेषानव
वसायात्संदेहसंकरः॥किंचविदग्धहवैभववर्णनस्यासंबंधकथनरूपातिशयोक्तेरुदात्तालं
कारेणसहैकवाचकानुप्रवेशसंकरः॥नियतिशयवितरणोत्कर्षपर्यवसायिनोहेत्वलंकारस्याप्यनु
तानत्थौदार्यवर्णनात्मकयात्युक्त्यासहैकवाचकानुप्रवेशसंकरः॥तन्मूलकस्याप्रस्तुतप्रशंसा
लंकारस्यप्रस्तुतांकुरस्यवाव्याजसेपत्समृद्धिवर्णनात्मकोदात्तालंकारेणसहैकवाचकानुप्रवेश
संकरः॥वाचकशब्दस्यप्रतिपादकमात्रपरतयाव्यंजकसाधारण्यात्तेषांत्रयाणामेकवाचका
नुप्रवेशसंकरस्यसमप्राधान्यसंकरः॥नह्येतेषांपरस्परमन्यत्रांगमस्ति॥उदात्तादिनात्रस्यैव
हेत्वलंकारादिनाचारुताप्रादकत्वेनातिशयोक्तिसंकरस्यांगतापानयेअक्षरणात्॥एवमन्यत्रश्लोके
ष्वन्येषामपिसंकराणांयथायोग्यसंकरः॥एवमन्येऽप्युदाहरणांतराण्यप्यूह्यानि॥अमुंकुवलयानंद
मकरोदप्पदीक्षितः॥नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः॥१॥चंद्रालोकोविजयतांशारदागमसं राम०
६९

वलयानंद भवः॥हृद्यःकुवलयानंदोयत्प्रसादादभूदयं॥२॥इतिश्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौ
६८ स्तुभश्रीरंगराजाध्वरींद्रवरसूनोरप्पदीक्षितस्यकृतिःकुवलयानंदःसमाप्तः॥श्रीरस्तु॥ ॥छ छ॥
दीक्षितश्रीजयशंकरात्मजजयाकांतोव्यलिखदिदंकुवलयानंदंवाराणस्यां॥ [redacted]
सवत १८२५ छ छ छ छ छ छ छ छ छ छ

राम०
६८